Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीः ॥

बालकोपदेशमालिका-श्रीरङ्गनाथप्रबोधनप्रबन्ध-प्रतिकृतिः-धर्मवादश्च ।

श्रीकांचीप्रतिवादिभयङ्कराण्णारंगाचार्यतनू-
जन्महस्त्यद्रिनाथापरनामधेयाण्णङ्ग-
राचार्यमहाशान्तेन विरचिताः ।
तेनैव परिशोधिताः ।

एते ग्रन्थाः
मुम्बय्यां
खेमराजश्रीकृष्णदासश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रायन्त्रे
सम्मुद्रिताः ।

1908 [illegible]

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीहरिकृष्णनिबन्धभवन
कचौरीगली-बनारस सिटी।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

THE BALAKOPADESHAMALIKA

SRIRANGANATHA PRABODHANA-PRABANDHA PRATIKRITI,

AND

DHARMAVADA

OF

C. P. B. Annangaracharyamaha Santa.

OR

HASTHYADRINATHA.

SON OF

C. P B. ANNARANGACHARIAR.

EDITED BY

KHEMRAJ SHRIKRISHNA DASS.

SHRI VENKATESHWAR STEAM PRESS
BOMBAY.

1908.

Copy right

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीः ॥

बालकोपदेशमालिका-श्रीरङ्गनाथप्रबोधनप्रबन्ध-प्रतिकृतिः-धर्मवादश्च ।

श्रीकांचीप्रतिवादिभयङ्कराण्णारंगाचार्यतनू-
जन्महस्त्यद्रिनाथापरनामधेयाण्णङ्ग-
राचार्यमहाशान्तेन विरचिताः ।
तेनैव परिशोधिताः ।

एते ग्रन्थाः
मुम्बय्यां
खेमराजश्रीकृष्णदासश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रायन्त्रे
सम्मुद्रिताः ।

1908 [मूल्यम्-अष्टकलाः]

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीरस्तु ॥

प्रस्तावना.

श्रीवेंकटाद्रिनिलयः

कमलाकामुकः पुमान् ।

अभंगुरविभूतिर्नः

तरङ्गयतु मङ्गलम् ॥

अयि ! प्रियपाठकमहोदयाः ! ! सादरं कर्णं कुरुत किमपीदमस्मदीयमावेदनम् । बालकोपदेशमालिकाभिधानस्सोयम्प्रबन्धोऽस्माभिः बालव्युत्पत्तिसिद्धये द्वित्रेभ्यो वर्षेभ्यः प्राक् श्रीप्रतिवादिभयङ्करगादि अनन्ताचार्यस्वामिभिः प्रचारितायां " वनमालिका " भिधानायां द्राविडभाषामयमासिकपत्रिकायां प्रकाशितमुपन्यासमवलम्ब्य भाषान्तरीकृतः प्रकाशितश्च॥ द्रविडभाषामयोपन्यासापेक्षयाऽत्र बहवो विषयाः कचित्कचिदालक्ष्येरन् । अयम्प्रबन्धः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रथमतस्संग्रहेण विलिख्य "विज्ञानचिन्तामणि" नाम्न्या संस्कृतभाषामयसाप्ताहिकपत्रिकायाञ्च प्रकटितोऽभवत् ।

इदम्प्रबन्धाध्ययनतो बालिशानामचिरादेव साधारणी व्युत्पत्तिस्समुन्मिषेदिति विस्रब्धं ब्रमः । अत्र च बुद्धिप्रमादाल्लेखनसम्भ्रमवशान्मुद्रणप्रमादाच्छोधनानवधानाच्च केषाञ्चिद्दोषाणां सन्निपातेपि, कृपया ते गुणग्राहिभिस्सहृदयशिरोमणिभिस्समीकरणीया इति सविनयादरसभाजनप्रणयप्रणतिपरम्परमभ्यर्थयामः ॥

"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेळाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥"

इति श्लोकरत्नञ्च समनुस्मारयामः ।

इदम्पुनर्विशिष्य वक्तव्यम् । यदीदृशानाम्प्रबन्धानाम्प्रकाशने महात्माऽयं खेमराज--श्रीकृष्णदासो बद्धश्रद्धस्समुल्लसतीति युक्तरूपमेवेदम्महाचार्यपादचरणनलिनसम्बन्धशालिनामिति ॥ स्वस्ति ॥ इति ।

भवतां विनयवशंवदः—

श्रीकाञ्ची—प्रतिवादिभयङ्करम्. अण्णङ्गराचार्यः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीरस्तु ॥

श्रीमते हयग्रीवाय नमः ।

श्रीवादिभीकरमहागुरवे नमः ।

धर्मवादः ।

(अवतारिका ।)

मम मनसि वसतु सततं वरवरयोगी विभूषितस्सुगुणैः ।
यच्चरणनलिनसेवी विषममतिस्स्यान्न सम्प्रदायार्थे ॥

श्रियःपतिरवाप्तसमस्तकामः श्रीवैकुण्ठनिकेतनः नित्यमुक्तानुभाव्यश्च स भगवान् सर्वेश्वरः—

"तेवुमेप्पोरुळुं पडैक्कप्पूविल् नान्मुकनैप्पडैत्त देवन्"

"उय्य वुलकु पडैक्कवेण्डियुन्दियिल् तोत्तिनाय् नान्मुकनै"

इत्याद्यनुगृहीतरीत्या, चराचरात्मकं देवादिपिपीलिकान्तमशेषमपि वस्तुजातं स्रष्टुकामः,

"यन्नाभीसरसीरुहोदरजनिस्स्रष्टा"

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्याद्युक्तरीत्या निजनाभिनलिने चतुर्मुखं ब्रह्माण मुत्पाद्य, तन्मुखेन सकलम्पदार्थजातमुत्पादयतीति श्रुति स्मृतीतिहासपुराणागमादिषु प्रसिद्धोयमंशः ।

तत्तच्चेतनकर्मानुगुण्येन कांश्चिन्मानुषान्, कांश्चिन्मृगान्, कांश्चित्पक्षिणश्चैवं विविधं सृजति जन्तून् विरिञ्चः । नह्येकविधं जन्म दृश्यते । अधो निर्दिष्टरीत्या बहुविधं हि तत् । निखिलजन्मापेक्षया मानुषजन्मदुर्लभमिति, "दुर्लभो मानुषो देहः" "नरत्वं दुर्लभं लोके" इत्यादिभिरभिधीयते ।

"एतादृशं दुर्लभम्मानुषजन्म पूर्वजन्मकृतसुकृतविशेषवशात्प्राप्तवतामस्माकमुदासीनेभ्यो मृगादिभ्यः केन पुनरंशेन विशेषवेदनम्" इति विचारिते—

"आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणाम् ।
ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिस्समानाः ॥" इत्यादिवचनानुसारेण ज्ञानेनैव भवति तदिति निर्धारयितुं शक्यते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ननु मृगादीनां किन्नास्ति ज्ञानम्? किमचेतनास्त इति चेत्; भोक्तव्यं, स्वप्तव्यमित्याद्याकारकं ज्ञानमत्र न ज्ञानपदेन विवक्ष्यते। अपि तु—

"ओण्डामरैयालूकेळ्वनोरुवनैयेनोक्कुमणर्वु"

इत्यनुगृहीतरीत्या भगवद्विषयकज्ञानमेव विवक्षितम्। अनादिशन्त्वज्ञानमेवेति

"तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्"

इत्यादिप्रमाणशरणैरभ्युपगन्तव्यम्। एवञ्चैतदुक्तम्भवति; यथावद्भगवत्स्वरूपाभिज्ञानमेव मानुषाणामसाधारणो धर्म इति। ननु--

"न मांसचक्षुरभिवीक्षते तम्"

"न चक्षुषा पश्यतिकश्चनैनम्"

इत्युपनिषदादिषु पठ्यमानतया कथमिव तदभिज्ञातुं शक्यते। इति चेत्;

"वेदैश्च सर्वैरहमेव वेद्यः"

इत्यादिकं किन्नश्रुतमहो भवद्भिः। शास्त्रैर्ज्ञातुं शक्यत एव।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदौ तावत्,

"विचित्रा देहसम्पत्तिरीश्वराय निवेदितुम् ।
पूर्वमेवकृता ब्रह्मन् ! हस्तपादादिसंयुता ॥"

इति स्वचरणकमलपरिचरणौपयिकतया भगवता दत्तैः करचरणादिभिर्भगवद्विषये किञ्चित्कृत्य प्राप्तव्यस्वरूपसिद्धिका वयन्तदकरणपूर्वकतद्विपरीतकर्मानुष्ठानशालिनः नदीनिस्तरणोपयुक्तं प्लवमारुह्य प्रतीपगमनपूर्वकमहासमुद्रसमागमवत्, शत्रुनिरसनकृते पितृप्रदत्तेन शस्त्रेण स्वशिरश्छेदपूर्वकनिधनभजनवच्च संसरणानिस्तरणोपायभूतान्यपि संसरणसाधनान्याकलय्य सञ्चितमहानर्थसञ्चयाः,अनाद्यविद्यासञ्चितानन्तपुण्यपापरूपकर्मानुगुणं विविधेषुयोनिषु विविधं जायमानाः, प्रतिजन्म च दुरन्ततापत्रयदवानलदह्यमानाः, अनादिकालं संसरन्तोऽप्यतीतानागतानभिज्ञतया संसारेऽस्मिन् शोकलेशरहिताः गर्भजन्मबाल्ययौवनवाधकमरणनरकरूपमवस्थासप्तकमनुविन्दन्तो दुःखपरम्परामनुबोभूयमानाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" संसारसागरं घोरमनन्तक्लेशभाजनम् । "

इत्याद्युक्तरीत्या महाक्लेशनिचयग्राहसहस्रसङ्कुले संसारसागरे निमज्ज्य व्याकुलीभवामः ।

एवन्नाम परिक्लिश्यतोऽस्मान् स भगवान् भूतभावनस्सर्वेश्वरस्समुद्वीक्ष्य—

" एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः ।
जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते ॥ "

" अचिदविशेषितान्प्रलयसीमनि संसरतः
करणकलेवरैर्घटयितुं दयमानमनाः "

इत्याद्युक्तरीत्या परमदयालुस्सन् " इतः परं वाप्येते सन्मार्गसारिणस्सदाचारसम्पन्नाश्च स्युरित्यवधार्य निजपरिचर्योपयोगितया करचरणादि प्रदाय पुनश्च तेन व्यभिचारासम्पत्तये--

" हर्तुन्तमस्सदसती च विवेक्तमीशो
मानम्प्रदीपमिवकारुणिको ददाति । "

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादिप्रकारेण शास्त्राणि च प्रादात् । [ननु को नाम शास्त्रशब्दार्थ इति चेत्; शास्तीति शास्त्रमिति शास्त्र-पदं व्युत्पद्यते । शासु—अनुशिष्टौ इति धातुः; इदं कुरु, इदम्माकार्षीरिति कार्याकार्यविधिनिषेधवाचकं यत्तदेव शास्त्रमिति "शासनाच्छास्त्रम्" इत्यादिभिरवगम्यते ।]

अथ शास्त्रैस्तदभिज्ञानफक्किका च कीदृशीति चेदुच्यते ।

" क्षरम्प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देवएकः । "

[प्रधानम्—प्रकृतिः, क्षरम्—क्षरणस्वभावशालिनी, विकारैकस्वभावेति यावत् । हरः—आत्मा, प्रकृतिम्भोग्यत्वेन हरत्यसाविति हरः । अमृताक्षरम्—अमृताक्षरशब्दवाच्य इति फलितोऽर्थः । क्षरात्मानौ—प्रकृतिपुरुषौ, ईशते देव एकः—एको देवस्तन्नियमनकर्तेत्यर्थः] इत्यनेन श्रुतिवाक्येन चिदचिदीश्वररूपतत्त्वत्रयस्वरूपं सम्यगावेद्य,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः "

इत्यनेनान्तर्यामिब्राह्मणवचनेन तमोवृतगृहे दीपारोपणवत्, काणचक्षुषश्चक्षुःप्रदानवच्च—निखिलचेतनाचेतनाश्शरीरम्; ईश्वरश्शरीरीत्यवीविदत्।

ननु किन्नाम शरीरशरीरिणोर्लक्षणमिति चेत्; ब्रूमः। शेषत्वधार्यत्वनियाम्यत्वं शरीरलक्षणम्; शेषित्वधारकत्वनियामकत्वं शरीरिलक्षणम्। एतदेव च रामानुजाचार्याभिमतम्।

"यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं शक्यं, तच्छेषतैकस्वरूपञ्च तत्तस्य शरीरम्"

इति हि तैरन्वग्राहि श्रीवेदार्थसंग्रहे। प्रसङ्गाच्छेषशेषिणोर्लक्षणमप्यत्र लिख्यते।

"परगतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपं स शेषः, परश्शेषी।" इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतच्च लक्षणं तैरेवाचार्यपादैर्वेदार्थसङ्ग्रहेऽनुगृहीतम् । " यथेष्टविनियोगार्हं शेषशब्देन कथ्यत " इत्यादिकमप्यत्रानुसन्धेयम् ।

भगवतस्सर्वेश्वरस्य सर्वेऽप्यात्मानश्शेषभूता इत्यस्य पारेपरार्द्धं हि प्रमाणान्यालक्ष्यंते ।

"यस्यास्मि न तमन्तरैमि" " परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते । " "दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः । नान्यथा लक्षणन्तेषां बन्धे मोक्षे तथैव च ॥" " स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि । आत्मदास्यं हरेस्स्वाम्यं स्वभावञ्च सदा स्मर ॥ " " ईश्वरेण जगत्सर्वं यथेष्टं विनियुज्यते ॥ "

इत्यादीनि ॥ अथ—

" द्वा सुपर्णा सयुजा सखाया समानं वृक्षम्परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति । " द्वा सुपर्णा—द्वौ पक्षिणौ; जीवा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्मपरमात्मानावत्र सुपर्णत्वेनोक्ताविति संक्षेपः । सयुजा—समानाधिकरणौ, सखाया—मिथो मित्रभावम्प्रतिपन्नौ, ('द्वा' इत्यादिश्छान्दसप्रयोगः) समानं वृक्षम्— अत्र वृक्षशब्देन शरीरं विवक्षितम् । परिषस्वजाते—आश्लिष्यतः, पक्षिरूपौ जीवात्मपरमात्मानौ वृक्षरूपं शरीरमाश्लिष्यत इति तात्पर्यम् । तयोः जीवात्मपरमात्मनोः, अन्यः--अन्यतरो जीवात्मा पिप्पलं--कटुभूतं विषयम्, स्वाद्वत्ति--रुचिरत्वेन भुंक्ते । अनश्नन्नन्यः—विषयानुभोगरहितः परमात्मा तु, अभिचाकशीति--कामम्प्रकाशते, यद्वा, अन्यः--परमात्मा, अनश्नन्नभिचाकशीति--विषयमननुभुञ्जानो भासत इति वार्थः ।

ननु, समानाधिकरणयोरुभयोर्मध्ये--एकस्य विषयानुभोग (जपातक) लेपः, अपरस्य तदभावश्चेति कथमिदमुपपद्यत इति चेत्; कारागारे दुष्कर्मकारिणा सह तत्पालकोऽपि निवेश्यते । अनयोरुभयोर्मध्ये कारागेहनिवासनिबन्धन एकस्य परं विषादलेपः अन्यस्य तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदभावश्चेत्येतद्यथा ह्युपपद्यते, तथैवेदमप्युपपद्यत इति ध्येयम् । इत्यादिश्रुतिवाक्येन चेतनानामचित्संसर्गः कर्मौपाधिक इति प्रदर्श्य--

" तदा विद्वान्पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति "

इत्यादिना पूर्वोक्तौपाधिकाचित्सम्बन्धविनाशोत्तर-कालीनस्य सूरिभोग्यभोगस्य क्वचिद्देशविशेषेऽनुभव एव स्वरूपानुरूपपुरुषार्थ इति प्रादर्शयत् । इयमेव शास्त्रै-स्तदभिज्ञानफक्कीति बोध्यम् ॥ अत्र आन्तरभावपरामर्शे तु, न कस्यापि चोद्यावकाशः । यद्यपि—

" शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम् ।
उपदेशाद्धरिं बुध्द्वा विरमेत्सर्वकर्मसु ॥"

[शास्त्रज्ञानं बहुक्लेशम्] " अनन्तपारं बहुवेदितव्यम-ल्पश्च कालो बहवश्च विघ्नाः " इत्याद्युक्तरीत्या ज्ञात-व्यविषयाणामपरिमेयत्वात्, आयुषश्च स्वल्पत्वात्, 'श्रेयांसि बहुविघ्नानि' इत्युक्तप्रकारेण विघ्नानाञ्च बाहुल्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्छास्त्रमधीत्य तन्मूलतो ज्ञानसम्पादनं कष्टसाध्यम् । [बुद्धेश्खलनकारणम्] श्रुतिषु क्वचित्,

" एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी " इति प्रतिपाद्य, अन्यत्र

" नसन्न चासच्छिव एव केवलः । " " आत्मा वा इदमेक एवाग्र आसीत् " इति मिथो विरुद्धम्प्रतिपादितम् । तत्त्वार्थनिर्धारणायत्वैककण्ठ्यं कर्तव्यम् । तच्च नास्मादृशानां किञ्चिज्ज्ञानां सुकरम् । अथ चैकक-ण्ठ्याकरणे बुद्धेश्खलनं भवतीति । अतः--[उपदेशाद्धरिं बुद्ध्वा विरमेत्सर्वकर्मसु।।] इत्यभिधानाच्छास्त्रतो भगवद्वेदन-मसाध्यमित्याचार्यकृपालब्धोपदेशात्तमभिज्ञाय सर्वेभ्योऽपि कर्मभ्यो विरमामस्सर्वे वयमशक्तम्मन्याः ॥

अथापि-" सञ्चेया वैदुषी प्राज्ञैः पुरुषार्थचतुष्टये "। इति- " धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते । अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥ " इत्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिप्रमाणबलेन, पुरुषार्थचतुष्टयज्ञानस्य यत्किञ्चित्पुरुषार्थस्य वा मानुषाणामावश्यकत्वात्तत्रापि धर्मस्वरूपावगमतदनुष्ठानयोरत्यन्तमावश्यकत्वादत्र धर्मस्वरूपम्परामृशामः । अनुवादोऽयमिति तत्त्वं बोध्यम् ॥

इति–श्रीकाञ्ची–प्रतिवादिभयङ्करम्.

अण्णङ्गराचार्यः ।

प्रबन्धकर्त्ता.

श्रीः ।

❀ इत्यवतारिका ❀

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीः ॥

प्रख्यापनम् ।

(विशेषतो द्रष्टव्यम् ।)

दिव्यप्रबन्धवैभवाविवेकः ।

इदन्नामकं किमपि प्रबन्धरत्नमेतत्प्रबन्धत्रयनिर्मात्रा प्रणीतः श्रीकाञ्च्यां श्रीसुदर्शनमुद्राक्षरशालायां विमलश्लक्ष्णपत्रिकासु ग्रन्थाक्षरैर्मुद्रापितः कलाचतुष्टयमूल्यको विक्रयाय सन्नद्धो वर्तते । प्रबन्धेऽस्मिन् कुमतप्रतिक्षेपपूर्वकं दिव्यप्रबन्धमाहात्म्यम्प्रमाणयुक्त्यादिभिर्व्यवस्थापितम् । इदम्पुनः पुस्तकमास्तिकानामत्यावश्यकं सदा हस्ते धारणीयञ्च ॥ आदित्सवः—C. P. B. Annangaracharіar 29 South Mada st L. Conjeeveram Hodgsonpet Post. इत्यत्र पत्रं प्रेरयन्त्विति ॥

खेमराज श्रीकृष्णदास,
" श्रीवेङ्कटेश्वर " स्टीम् प्रेसाध्यक्ष,
मुंबई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीरस्तु ॥

श्रीमते हयग्रीवाय नमः ।

श्रीबालकोपदेशमालिका ।

मङ्गलाचरणम् ।

श्रीभाष्यकारनमनम् ।

यतिपतये नतिविततीः करवै मुरवैरिभक्तमुख्याय ।
तेने भुजङ्गभङ्गं भुजङ्गभावं स्वयम्भजन्नपि यः ॥ १ ॥

श्रीवादिभीकराभिवादनम् ।

वन्दे वादिभयङ्करगुरुवरचरणौ सदा भवोत्तरणौ ।
प्राभातिकाम्बुजन्मप्रभाऽपि याभ्याम्पराभवङ्गमिता ॥ २ ॥

श्रीदेवाधिराजप्रार्थना ।

करिभूधरनाथकीरपोतो हृदयात्युत्तमपञ्जरे मदीये । कृतिवि
घ्नकदम्बबिम्बराशिं निवसन् भक्षयतात्सुखादजस्रम् ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सरस्वतीवन्दनम् ।

सरस्वतीं शुभगुणाम्पदानतवशंवदाम् ।
वन्दे वाञ्छितलाभाय वेधसस्सहधर्मिणीम् ॥ ४ ॥

आचार्यप्रणातिः ।

गुरुपादाननन्तार्यान्परवादिभयङ्कुरान् ।
लिप्सुः श्रेयांसि भूयांसि नमामि शिरसा मुदा ॥ ५ ॥

कथारम्भः ।

भो भोः ! प्रियसहोदराः ! ! अन्तर्वाणयः ! ! !

साम्प्रतमस्माभिरारच्यमानं कमपि नातिदीर्घमुपन्यासं कलयत कर्णे सदयोदयेन चेतसा क्षणमनुकूलेन भावबन्धेन ।

अस्माकं हि सत्पथे दुष्पथे वा मनसः प्रवर्त्तनं कस्यापि पुरुषस्याऽऽचारानुरोधेनैव प्राक्तनजन्मकृतसुकृतदुरितोचितमेव सञ्जायत इति न खलु नाधिगतमेतत्तत्रभवताम् । तथैव च वयमभिप्रेमो धृष्ट्या विरचयितुम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शैशवे वयं विहरणाय मातापितृभ्यां यादृशगुणवद्भि-र्बालकैस्संयोजिता भवेम, अनन्तरं तादृशगुणा एव भवामो वयमित्यपि प्रत्यक्षदृष्टङ्खलु प्रियसुहृदाम् ।

अपि च युक्ते वयसि दिष्ट्या वयं सद्गुणसम्पन्नास्सदा-चारनिष्ठास्सुकृतिनश्च यदि तावद्वर्त्तेमहि, तदपि चास्माकं बाल्ये मातापित्रोः प्रियाकांक्षिणोश्शिक्षायाः फलमेव मर्त्तमिति मन्तव्यम् ।

पित्रोस्स्वकीयपुत्रेऽधिरोपितयाऽतिसीमया प्रीत्या स पुत्रः कथञ्चिदपि न खलु शिक्षणीयो भवति । तौ च पितरौ सङ्कोचयतीव पुत्रवत्सलता तत्र विषये । अतस्ता-भ्यां परमप्रेमभाजनमपि पुत्रो वृद्धिकांक्षिभ्यां कस्यापि विदुष उपाध्यायस्याऽऽकलितो वशंवदस्सन्मार्गराज्यनि-र्वाहधुरन्धरः कारयितव्य इति सार्वलौकिकोऽयं प्रवादः । अध्यापकानां कुशाग्रधिषणतया मन्दमतयोऽपि कोमल-मतयः कृता एव स्युर्महतापि वा प्रयासेनेति नात्र मात्र-यापि विवदितव्यम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्रापि केचन देशिका वेतनग्रहणमात्रपरतया "योपि कोपि वा मृतो यस्मै कस्मैचिद्वा निमित्ताय विलपामि" इतिवदध्यापनमृणप्रायम्मन्यमानाः कार्यान्तरव्यग्रमानसा अध्यापने वैयग्र्यन्नाटयन्तः पाठयन्ति विद्यार्थिन इति किमु विशिष्य वक्तव्यङ्कलिहतकेऽप्यत्र ।

केचन श्रद्धालवस्तु देशिकाः श्रेयः कीर्त्तिकामाः वेतनमपि तृणाय मन्यमानास्स्वीयाऽऽत्मजवत्पाठयन्ति तानिति च निशामयामस्साक्षात् ।

अस्य च निदर्शनतया पुराणैः प्राज्ञपुङ्गवैरुदाहृतां कामपि कथामत्र प्रसक्तानुप्रसक्त्या विवेचयामः ।

हरिपुराभिधाने कस्मिंश्चिदग्रहारे काचिदासीत्पाठशाला स्वल्पीयसी । प्रावर्त्तयच्च तां सुमतिनामा कश्चित्पण्डितकुलमण्डनः कविकुलधौरेयः स्वाधमस्य कस्याप्यन्यस्य सुनीतिनाम्नोऽध्यापकस्य साहाय्यकेन ।

स्वल्पायामपि शालायां तस्यां भूयांस एवावर्तन्त विद्यार्थिनः । सेयं शाला कुग्रामवर्तिन्यपि विद्यार्थिनाम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पथप्रवेशनिरसनपूर्वकसुपथप्रवेशने सद्विषयोपदेशे वा पटीयसा सुमतिना तेन राज्यशासकप्रतिष्ठापितेव समपादि।

निदाघकालविरातिदिनावसानोत्तरतः पाठशालेयमुद्घाटि । दिने च तस्मिन्नवीनः कोपि विद्यार्थी सुमत्युपाध्यायसनीडमुपगम्य सप्रश्रयमवातिष्ठत । तस्य च सव्यहस्ते किमपि लेख्यमवर्तिष्ट । उपाध्यायेन किमित्यनुयुक्तस्सोयं किमप्यप्रत्युत्तरयन् लेख्यं व्यतारीत्तस्मै । स तत्प्रतिगृह्य स्वोपवेशदेशं प्रत्याजगाम । अपरस्त्वध्यापकः शालागमनाय निर्णीतात्किञ्चिदिव पूर्वस्मादेव कालात्पाठशालामायातोऽवर्तत ।

अत्रेदं तत्त्वम् । पाठशालासु निर्दिष्टपाठारम्भकालात्पूर्वमेव समागन्तव्यमशेषैर्देशिकैः । अथ च ते स्वीयगतागतसूचीपुस्तके हस्तलिपिं विन्यस्याऽऽगमनपारिश्रममपनुद्य प्रवचनाय यदि सज्जीभूतास्स्युस्तदा सुकरस्स्यात्तेषामप्रवचनारम्भः । इदमादिपरीक्षाधिकारस्य प्रथमोपाध्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या (Head-master) धीनतया तदागमनात्प्रागेवान्यैरागन्तव्यमशेषैरध्यापकैरिति नैतन्न विदितमत्रभवताम् । नियमाश्चैते पाठशालीयनियमेषु मुख्याः प्रथन्ते ।

अथ तावन्नव्यविद्यार्थिना तेनानीतां पत्रीन्तामनुवाचितवता सुमतिना जज्ञिरेऽमी वृत्तान्ताः । ते चैते—

॥ श्रीरस्तु ॥

No. $\frac{157}{936}$ } जयजय श्रीसुदर्शन ! ।

" H. V-P-S-रामचन्द्रस्येयं विज्ञप्तिस्सविनयादरसभाजना ।

उभयस्थलकुशलोदन्तविचरानन्तरम् । अयि ! महाभागाः ! ! पण्डितरत्नानि ! ! ! सुहृत्तमाः !

एतल्लेख्यानेता मामकस्तनूजन्मा।एष युष्माभिरकम्पयाऽनुकम्पया प्रियान्तेवासित्वेन स्वाधीनत्वेन च स्वीकार्य इत्यभ्यर्थये सानन्तप्रणामम् । अस्य च कुमारस्याऽऽपूर्वदिवसाव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सानं सम्पूर्णानि द्वादश वयसाम्। न चेयतानेहसाऽस्य पाठयितारस्समतन्वन्त विमलधियमेनमिति तावदिदं दौर्भाग्यमेव मामकमिति मन्तव्यम्। अस्मदवगतेषु पाठकेषु भवन्त एव विद्याभ्यासजागरूकाः पटीयांसश्चेति मया मनसा निरधारिषत सत्यम् । अत एवायमनुप्रैषि भवदुपान्तिकम् । अयञ्च यावद्युष्मदधीनस्स्यात्तावदद्सीयसुखाधान (र) विषये न मया किञ्चिदपि चिन्तितव्यमिति मे धृष्टता ।

इतः पूर्वमस्य विद्याभ्यासाय नियमिता उपाध्यायास्तु, "इतोऽपि किञ्चित्कालपर्यन्तं नास्यास्ति किञ्चिदपि विद्याधिगमभागधेयम् " इति निवेद्य सुखेन प्रैषयन्नेनम् । अस्य च कुमारस्य लेखनपठनमात्रचातुर्याऽलमिति सुबहुपरिश्रान्तमपि किमपि न व्यलोकि फलमिति शोकास्पदमिदमतितरामस्माकम् । गणिताभ्यसनविषयेऽपि किञ्चिदिव परिश्रान्तमस्माभिः । तत्रापि तथैव । अस्य स्मरणावधानादिशक्तिशून्यतया भूगोलदेशचारित्राद्यर्थावगमचातुरी नैवोदपद्यत । इदमादिपर्यालोचने त्वस्य नास्तीषदपि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिभेत्येव सुवचम् । सेयमस्ति नेत्येतदुभयस्मिन्नन्यतरद्युष्मद्द्वाराऽवजिगमिषति सोऽयञ्जनः । किञ्च भवतां विद्यार्थिनां धिषणासद्भावतदभावावगतेश्चिरादानुभाविकतया यदि स्यादयं मेधावी यस्यां कक्ष्यायाम्प्रवेशनार्हस्तत्र प्रवेशितो मनुष्यकोटौ च संयोजनीयो द्राक् सद्विषयबोधनाविरचितश्चतुर इति साष्टाङ्गप्रणाममभ्यर्थये । इदमादिकमखिलं युष्मदायत्तम् । अत्र च विषये भवतां हृदयं क्षिप्रमवगन्तुकामं त्वरत इदम्मामकीनमन्तरङ्गम् । किमधिकेनानेनाऽरटितेन । भवदीयकरुणाकमलधिसकलकलानिधिः कार्योयञ्जन इत्येव सहस्रशः प्रार्थ्यते । अथ वा; नेदमधिकतया निवेदनीयं युष्मभ्यं विदितवेदितव्यानिखिलमर्मभ्य इति तूलिकां कार्यान्तरे व्यापारयामः । प्रत्युत्तरम्प्रतीक्षे ।

'करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।'

इति भवदकृत्रिममैत्रीपात्रम्—

Haripurum } H. V. P. S. Ramchandradass.
5–10–835 } 28-Trivikrama swamy temple street—

इति ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुमतिरयमुपाध्यायस्तामाऽन्तमनुवाच्य 'पश्य' इति सुनीतिहस्ते प्रायच्छत् । स चानुवाच्य व्यजानादशेषमुदन्तजातम् । अथोभावपि सस्मितं शिरः कम्पयाञ्चक्राते।

सुमतिः—आर्य ! सुनीते !! इदमत्र चित्रम् । यदुत पत्राहर्तायं बालकस्स मौनं मत्करवितीर्णपत्रतया प्रथमं मूकत्वसंशयभाजनतां नीतो मया। अद्य तु न तथा। विषयोयमीदृश इति परिज्ञानात्पूर्वं तत्र बुद्धिप्रसारणङ्कथम् । कस्य वा प्रसरेद्बुद्धिः । हन्त चित्रम् ।

सुनीतिः—ईदृशी हता बुद्धिर्बहूनां जनानां सहजैव दृश्यते । प्राणिवर्ग्यस्य बुद्धिर्नास्तीति कथम् ?। स च मनुष्य एव खलु ?। तामानाय्य पश्यावः । ज्ञानाङ्गेषु कस्य वास्ति वैकल्यम् ? । शुकशारिकाप्रभृतयोऽपि खलु शिक्षिता मधुरं गायन्ति । भवन्ति च पटवस्संभाषणे । किमुत मनुष्याः ?।

सुमतिः—ज्ञानाङ्गन्यूनतासद्भावे प्रागेवोपाध्यायैस्संसूच्येत । रामचन्द्रेणाप्यावेद्येत ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुनीतिः—तात्त्विकमेवेदम् । यदि स्यादयमुच्चारितो भवद्भिः, तदा कमलाजानि, कमलसम्भव, दिविषत्पति, दिविषदादयः कलशतोयधि, मल्लिकाक्षै, रावत, हिमवदादीनन्वेक्ष्यन्त्येव सत्यम् ।

सुमतिः—(सविस्मयमिव) एतदुच्चारणतदन्वेषणयोः कस्संबन्धः ? । पृष्ठताडनाद्दन्तभङ्ग इव तव वचनझरी सन्तनोति मे हृदि सम्मोदम् । किमत्र रहस्यम् ? । आविष्क्रियताम् ।

सुनीतिः—किं वास्त्यत्र रहस्यम् ? । कविभिर्यशस्सितत्वेन ह्यभिवर्ण्यते । एतत्समुच्चारणसमुद्भूतयशोमण्डलेन सितीकृते वस्तुसर्वस्वे स्वंस्वं वस्त्वन्वेक्ष्यन्तीति नैषा नवीना फक्किका ।

सुमतिः—एवमेव केनापि कविना क्वचिद्वर्णितमास्ते । सम्प्रति तु स कविः, तत्प्रकरणं, तत्पद्यं, च न स्मृतिमुपयन्ति ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुनीतिः—(स्वीयविद्यार्थिष्वन्यतममाहूय) रे ! अन्नम्भट्ट !! कुत्रैवं वर्णितम् । को नाम वर्णयिता कविः। किन्तत्पद्यम् ? । अभिधेहि । ...... हुम् । हुम् । कुतो विलम्बः ? ।

विद्यार्थी—(स्मृतिमभिनीय) कालिदासमहाकविना भोजचरित्रग्रन्थे वर्णितम् । तदेतत्पद्यम् "महाराज श्रीमन् ! जगति यशसा ते धवलिते पयः पारावारं परमपुरुषोयं मृगयते ॥ कपर्दी कैलासं करिवरमभौमङ्कुलिशभृत्कलानाथं राहुः कमलभवनो हंसमधुना" ॥ इत्यादिकम् ।

सुमतिः—आम् । उपपद्यते । नास्माकं यशःप्रतीक्षिता ।

सुनीतिः—अन्यैरुपाध्यायैः परित्यक्तस्यातीतद्वादशवयसश्च कुमारस्य समुच्चारणमिति यत्किन्तत्साधारणङ्कर्म ? ।

सुमतिः—तत्सत्यम् । एतदुच्चारणेनाऽस्माकीनपाठशालाया महीयसी भवेत्ख्यातिः । सैव प्रतीक्ष्यते मया ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुनीतिः—सत्यमेवेदम् । अद्यप्रभृति प्रयतितव्यमेतदुत्तारणे ।

सुमतिः—मय्येकस्मिन् सर्वं भरमवक्षिप्य किन्तिष्ठास्यते भवद्भिर्वीतचिन्तैः ?। अत्र युष्माभिरर्धमादेयं श्रमस्य । तत्सुकृते पाठशालोत्कर्षख्यातौ च स्वत एवार्धं सन्निधास्यति भवतः ।

सुनीतिः—(सप्रश्रयादरम्) श्रैमतं शासनं शिरसा वोढुं सज्जीभूताः स्मः ।

(अथ तदाज्ञानुसारेण स नव्यविद्यार्थी तयोः पुरस्समागत्याऽऽनामितमूर्धाऽवतस्थे ।)

सुमतिः—वत्स ! किमभिधानो भवान् ? ।

बालः—(ससाध्वसोत्कम्पम्) आर्याः ! सोमसुन्दरनामाहमस्मि ।

सुमतिः—वत्स ! सोमसुन्दर ! ! सन्निधेहि । मा भैषीः मा भैषीः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालः–(सोत्कम्पस्ससभयश्चाध्यापकसुमतिं समया गमयामासाऽऽत्मानम्।)

सुनीतिः–(वत्सवदनारविन्दं स्पृशन्) वत्स! सोम! मा बिभीहि। किं वा करिष्यामस्त्वाम्। के वा किङ्करिष्यन्ति भवन्तम्?। (अथ किञ्चिदिव सुधीरं बालं दृष्ट्वा) वत्स! कतमस्मिन् वयसि वर्तेतेद्य भवान्?। कथय। जानीषे?।

बालः–जाने। त्रयोदशे। आपूर्वदिवसात्पूर्तिमगाद्द्वादशं वयः।

सुनीतिः–विदग्धचतुरोऽयं बालकः।

सुमतिः–वत्स! किम्भवान् विजानीते?।

बालः–(अदत्तोत्तरो जोषमवतिष्ठतेऽवनतमूर्धा)।

सुमतिः–(आत्मगतम्) किन्तूष्णीमास्ते। भवतु तावदेवं प्रक्ष्यामि। (प्रकाशम्) अपि वेत्सि गोलिकागोलदेवनम्?।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालः—(सव्रीडाभिनयम् ।) जाने ।

सुमतिः—रेखाक्रीडितम् ? ।(उप्पुकोडितिप्रसिद्धदेवनम्)

बालः—(समन्दस्वरम्) तदपि ।

सुनीतिः—भ्रमिकन्दुककरिकन्दुककरिमुखकन्दुकादिक्रीडा अपि कच्चित्पर्यचीयन्त ? ।

बालः—(सस्मितम्) सम्यगेव ।

सुमतिः—तर्हि देहाङ्गुलिपाणिपादादिकमखिलं भवदायत्तमेव खलु स्यात् ? ।

बालः—अथ किम् ।

सुमतिः—अक्षराणि विलिखेर्वा ? ।

बालः—लेखनं किञ्चित्पर्यचाय्येव । उत्तरोत्तरं तदभिवृद्धिर्नाकारीत्येव ममाद्य परमः खेदः ।

सुमतिः—(साक्षिस्पन्दनम् ।) कुतो वा नाकारि ? ।

बालः—(सलज्जम्) समजनिषताक्षराणि दूरीकृतसौष्ठवानि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुमतिः—वत्स ! पाणौ ते कत्यासतेऽङ्गुल्यः । कथय तावदविलम्बितम् ।

बालः—एकैकस्मिन् पञ्च ।

सुमतिः—इतरेषां भवादृशानां बालानामितोप्यधिकास्सन्ति किम् ? ।

बालः—नैव । किमद्भुताद्भुतमनुयोगमाकलयन्ति भवन्तः?।

सुनीतिः—(स्वगतम्) अतिचतुर एवायं बालः ।

सुमतिः—तर्हि कथन्ते विलिखन्त्यक्षराणि ? ।

बालः—(जोषन्तिष्ठत्यधोमुखः ।)

सुमतिः—(समन्दस्मितम् ।) वत्स ! पाणिन्ते प्रसारय पश्यामः ।

बालः—(प्रसारयति ।)

सुमतिः—वत्स ! सोम ! लेखनप्रतिबन्धकं न किमपि निशाम्यते खल्वत्र । गोलिकागोलानामिव लेखिन्यादेरपि ग्रहणं सुशकमेव खल्वस्य ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालः—किमपि प्रष्टुकामोऽस्मि ।

सुमतिः—पृच्छ्यतां स्वैरम् ।

बालः—लेखिन्यादेरित्यत्राऽऽदिपदेन कस्य ग्रहणमिति ।

सुमतिः— } अद्य चतुरोसि । वत्स ! शृणु वदामः । किं
सुनीतिः— } कठिन्या ग्रहणं न शक्यते कर्तुमादिपदेन ? ।

बालः—(सलज्जं हसन् जोषमवनतशिरा अवतिष्ठते ।)

सुमतिः—वत्स ! तिष्ठतु नामेदम् । लिखितान्यक्षराणि वाचयेर्वा ? ।

बालः—किञ्चित् किञ्चित् स्खालित्येन पठेयम् ।

उपाध्यायः—तर्हि तस्मिन् कवाटे पृष्ठभागे लिखितं वाचय किञ्चिच्छृणुमः ।

बालः—यथाशक्ति पठामि स्वामिनः ! । मा परिहसन्तु भवन्तो माम् । "आबाल्यादतिकृच्छ्राद्विद्या शिक्ष्येति सम्मतं प्राचाम् । कान्ता मातापत्यस्यास्समतामाप्नोति नोपकारविधौ ॥" इति सस्खालित्यमन्ववीवचत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपाध्यायः—अपि जानासि भावमस्य श्लोकस्य ?

बालः—(मन्दम्) न जाने सम्यक् ।

उपाध्यायः—सम्यङ्ङ न ज्ञायते। किञ्चिज्जानासि वा ?।

बालः—"बाल्यमारभ्य विद्या शिक्षणीयेति प्राचीनानाम्मतम्। विद्या यादृशमुपकारमाधत्ते तादृशं भार्या वा मातापि वा न कर्तुङ्कल्पेते" इति शब्दशैल्या किंचिज्जाने ।

उपाध्या:—किञ्चिदिति किमर्थम्। सम्यगेवेत्युच्यताम् । अयमेव समग्रो भावस्तस्यास्य पद्यस्य। कोऽन्योस्ति । तिष्ठत्विदम्। एतावत्पठनचातुरी भवता किञ्चित्प्रयासेनैव खलु समपादि ?। इतोपि किञ्चित्परिश्रान्ते, तदा सम्यक्पठनपाटवम्भवेदेव खलु ?। साधुसाधु । द्राविडलक्षणग्रन्थेषु किञ्चिद्वा कच्चित्परिचयोऽस्ति ?।

बालः—नैव महाभागाः !।

उपा—वत्स ! भवता ते कदापि नापाठिषतैव वा ?।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालः—तत्पठनाय बहूद्युक्तमेव मया । उद्योजितश्च तातपादैरभवम् । परन्तु, पुस्तकानवलोकनपूर्वकवाचा प्रतिपादनं कर्तुं नापीपरम् ।

उपा—वत्स ! तव किमपि वाचा वक्तुं शक्यं न भवति किम् ? । नामधेयानि वासराणामपि क्रमशो नैव सुवचानि ते ? ।

बालः—तानि सम्यग्ब्रूयाम् ।

उपा—मासानां नामानि तु ? ।

बालः—तान्यपि ।

उपा—वत्स ! भवदीयस्निग्धसोदरपारिचारकबान्धवपारवेशिकादीनामन्येषाञ्च पुरुषाणां नामधेयानि वक्तुम्पटुरसि ? ।

बालः—(समन्दहासम्) पटीयानस्मि ।

उपा—एतन्नामधेयानाम्मनसि स्थिरीभावे कथं पुनर्लक्षणलक्ष्यादिनामधेयानि न स्थिरीभवेयुः ? ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालः—[मूक इव तिष्ठति ।]

उपा—गणितादिकं यत्किञ्चिदुपयुक्तमपि जानासि ? ।

बालः—संकलनगणितं परमभिजाने । तदुपरि तन्नैव मयाऽभ्यस्तम् ।

उपा—कुत इव ? ।

बालः—तन्न मे हृदयमवागाहत गाढम् ।

सुनीतिः—वत्स ! कलयैकया कति गोलिका गोळाः क्रीयेरन् ? ।

बालः—नव्याश्चेद्द्वादश ।

उपा—कलाद्वयेन तु ? ।

बालः—चतुर्विंशतिः ।

उपा—एकैकस्मिन् देवने गोलिकागोळद्वये पणीकृते, कलाद्वयक्रीतगोलिकाः कतिषु देवनेषु पणीक्रियेरन्? ।

बालः—द्वादशसु ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपा—वत्स ! एकैकस्मिन् दिवसे त्वया गोलिका गुलिका द्वयं ग्लहतया सञ्चीयेत चेत्, सप्ताह एकस्मिन् कति गोलिकास्सम्पाद्येरन् ? ।

बालः—चतुर्दश ।

उपा—भवन्मित्राय गोलिकाद्वयं प्रतिपादितं चेदवशिष्टाः कति ? ।

बालः—द्वादश ।

उपा—वत्स ! सोमसुन्दर ! ! संकलनव्यवकलनगुणनविभजनाख्यप्रधानगणिताङ्गचतुष्टयं सम्यगेव ज्ञायते । अयमेव गणिताभ्यासो नाम । साधु वत्स ! साधु । त्वां यथोचितं समर्थयितुं पारयामो वयम् । भवतो यत्सुकरं तदेव कुर्विति वयमादेक्ष्यामो भवन्तम् । भवता पुनस्तदवश्यङ्करणीयमेव । "तत्किं वा, नाहं वेद्मि" इति व्याजोक्तिकथनं नास्माभिरुररीक्रियेत ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वयं यथा यथा यद्यद्यदायदाऽऽज्ञापयामस्तथा तथा तत्तत्तदातदाऽनुष्ठेयमेव भवता । किम् ? ।

बालः–नात्र कियानप्याक्षेपः । "यथा देवे तथा गुरौ" इत्यभियुक्तसूक्तं किमहो मया न ज्ञायते ? ।

उपा–आम् । साधु । Yes very good याहि वत्स ! याहि । पाठशालीयबालैस्संयुङ्क्ष्व ।

बालः–(कवाटलिखितश्लोकमवलोकयन्मनसा पुनःपुनरनुध्यायंश्चिन्तयति ।)

सुनीतिः–मान्य महाशय ! एतत्पाठशालीयविद्यार्थिषु मध्ये सोयमतिचतुरस्स्यादिति तर्कयामि ।

उपा–तर्कयामीति किम् । 'चतुरतम इति निश्चिन्वे' इत्यभिधीयताम् ।

सुनीतिः–सुन्दर ! गच्छगच्छ । पाठशालीयबालकैस्समुपविश ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवम्प्रकारेण परीक्षावसानानन्तरं सोमसुन्दरो धृष्टो हृष्टश्च पाठशालीयबालकानां पार्श्वेऽवतस्थे ।

अथ सोयमितरेष्वपुरेव पठनमारेभे । तस्मिन् दिने तत्ता-राबलादिसामञ्जस्यसद्भावादिदमेव महाशकुनम्मन्यमानेन सुमतिना कोमलमतिना स पाठारम्भायाऽऽज्ञप्तः । प्रायशो विद्याभवनीयकुमारेषु कोऽपि प्रत्न आचारश्चिरात्प्रथते । स तावत्—"ये केचिन्नव्यविद्यार्थिनः प्राथमिकतया पाठ-शालाम्प्रविष्टाश्चेत्पुराणविद्यार्थिनस्तान् द्वित्रदिनानि न सन्निधेयासुः । न च भाषेरन् । अथ यथाक्रमं सहवासः। अत्रान्तरे पञ्चषदिनानि व्यतीतानि भवेयुः । अनुपदमेव द्वित्रैस्सह प्रणयसँल्लपनम् । तस्य केषाञ्चिदक्षमता । अन-न्तरं परस्परद्वेषेण महीयान् कोलाहलः । नव्यः कुमारो धीरश्चेत्तानलक्ष्यीकृत्य तदधमभावमनुद्वहन्, अधीरश्चेत्तान-नुसृत्य तदधमभावमुद्वहंश्च द्वेषन्निराकुर्यात् । अनन्तरं परस्परसख्योद्वाहः । सहपाठिनो नव्यं यदि कुमारं परम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैरभाजनं कुर्युस्तदा द्वेष्यः कुमारो विविधयातना अनुभवेत्। ते सर्वेऽप्येकीभूय नव्यकुमारं प्रद्विषन्तः पाठचिन्तनादिकमकारयन्तो विद्याशालीयनियमान् सम्यगनाभिदधानाश्च सर्वथा हिंसेरन्।" इति। ईदृशानि दुष्कर्माणि पाठशालासु राजकीयासु न संपद्येरन्। कुग्रामीणासु त्वद्यापि सम्पद्यन्ते निरन्तरायम्। देशभाषामात्रनिवेदकवेद्यपाठशालासु दुश्चेष्टितान्यमूनि भूयांसि। तत्र सर्वदा विद्यार्थिदोषविचारणयैव देशिकस्य सर्वस्यापि कालस्य यापयितुं शक्यतया प्रतिनिमेषं यस्य कस्यापि बालस्य दोषविचारणावसरेऽन्येषां दुश्चरिताचरणस्य सहजतया तदादिषु बुद्धिप्रसारणस्य दुस्साध्यतया कस्यापि बालस्य दुश्चरितविषये सर्वोक्तसाक्ष्येऽपराद्धबालस्याशिक्षणीयतातया दुश्शकतया चेदृशानि कर्माणि विशेषतस्सम्पद्येरन् सत्यम्।

सोमसुन्दरोऽयं पूर्वं बह्वीषु पाठशालास्वध्येतृपदवमधिष्ठिततया प्रकृतिम्परिज्ञाय सहपाठिनां यथा च स्वीय-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुणगौरवक्षतिर्नोदियात्तथा बहुचातुर्यात्सतीर्थ्येषु प्राथमिकीम्पदवीमध्यतिष्ठत्परीक्षासु । अस्य च सुन्दरस्य द्वादशवयस्कतया बुद्धिपारिष्करणं किञ्चित्प्रयाससाध्यमित्यमानि सुनीतिना देशिकेन । परं सुमतिना कोमलमतिना सुकरमेव तन्निरचायि ।

सुमतिरयं सोमसुन्दरान्न्यूनवयसं धीमन्तं कमपि बालकमदसीयपाठचिन्तनादिकं कारयितुं लेखनगणितचतुरञ्च विरचयितुं पर्यकल्पयत् । अतस्सोयं सोमसुन्दरः पाठशालीयविद्यार्थिष्वध्यास्त प्राथमिकीम्पदवीम् । विद्याभिवृद्धिरक्षमा प्रधानहेतुका । नैव सेयममुष्मिन् कर्मणि विगीता । "एतद्बालापेक्षयाऽस्माभिरतिचतुरैर्भाव्यम्" इति यस्य स्यात्स्पर्धा स एवाविलंबितं भवत्युत्तीर्ण इति नात्र विशयावकाशकणिकापि । एतदर्थे 'बहुभिस्सम्मेल्य पठनीयम्' इति प्राचां निर्बन्धः । तत्तद्दैनिकपाठान् यो वा पारयत्युपपादयितुमन्तरेण स्खालित्यं स कदापि क्वापि परी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षायां नानुत्तीर्णस्स्यात्। तत्तद्वत्सरान्ते सहपाठिषु सर्वेष्वप्यशेषेषु विषयेषु च "अस्माभिरेवोत्तीर्णैर्भाव्यम्, अनुपदसंवत्सरे शाखान्तरं प्रविश्य प्राथमिकपारितोषिकञ्च ग्राह्यम्" इति यस्यास्ति कामः, तस्य विद्याभिवृद्धिविषये कस्संदेहः। एतद्विषयेऽस्मदुपाध्यायाभिहितं कमपि श्लोकमत्र प्रदर्शयामः।

"एकैकस्मिन् वत्सर एकैकं स्थानमतिपतेद्योऽत्र।
स गुरू राजस्थाने तुङ्गो राजत्यनीदृशो मन्दः॥" इति।

नवसु च ग्रहेषु एकैकास्मिन् वर्षे यस्स्वस्थानम्परित्यज्यान्यदवाप्नुते स एव गुरुः परिकीर्त्यते। स राजस्थाने भजत्युच्चपदम्। अनीदृशो मन्दो भवेत्। (गुरुः—बृहस्पतिः। राजा—चन्द्रः। तत्स्थानं कर्कटकः। तद्गुरोरुच्चस्थानम्। मन्दः—शनिः। स्थानं राशिः। शनिरेकैकस्मिन् राशौ वत्सरद्वयाधिकं कालं वरीवर्ति। तद्वत्पाठशालासु एकैकास्मिन् वत्सर एकैकं स्थानं (कक्ष्या—Class) परित्यज्योपरिगन्ता विद्यार्थी गुरुर्भूत्वा राजस-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भासु गरिमाणमुपलभेत । अनीदृशः (एकस्मिन्नेव स्थाने बहुकालं वर्तमानः) मन्दः—(मूढस्स्यात् ।) इत्येवमस्य पद्यस्य भावः । एतेन तदनुभवविदितो मुख्यो विषयोऽयमेवेति सम्यग्व्यक्तीभवति ।विद्यार्थिनां तावदुपाध्यायाभिधीयमानविषयग्रहणशक्तिरत्यावश्यकी ।

"आस्थास्वास्थ्ये यदि स्यातामेधया किम्प्रयोजनम् ।
ते उभे यदि न स्यातामेधया किम्प्रयोजनम् ॥" इति

मनुष्यस्य श्रद्धानैश्चिन्त्यैतदुभयसत्त्वे मेधाविरहेपि न कापि हानिः । पूर्वोक्तोभयसद्भावे मेधाभावेपि पुरुषा भवेयुरुत्तीर्णाः ।तदुभयाभावे मेधासत्त्वेपि नैव नूनं स्युरुत्तीर्णाः। इति श्लोकस्यास्य तात्पर्यम् ।

सुमत्युपाध्यायवशगोयं सुन्दरस्तदुभयमप्याचिरादेव सम्पाद्य महीयसीमभिवृद्धिमुपेयाय । उपाध्यायोपि कणशः कणशः प्रतिबोध्य सद्विषयांस्तमवीवृधत् । लिखिताक्षराणां शीघ्रपठने सर्वविधाक्षरविलेखने लक्षणप्रश्नप्रत्युक्तौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सङ्कलनव्यवकलनगुणनविभजनादिषु प्रधानेषु गणितेषु च समचिनोदचिरेणैव चातुरीमनन्यसाधारणां सुन्दरः।

लक्ष्यपाठेषु बुद्धिविकासं नीतिज्ञानमपठितश्लोकार्थज्ञानञ्च समपादयदह्नाय। बालानाम्प्रथमतः पाठारम्भकाल एव दुर्भरपाठभरसंवाहने तेषां किञ्चिदपि नोदियात्पिपठिषा। जायेतापि पाठे विचिकित्सा। मनसश्चान्यादृशः खेद उन्मिषेत्। शक्तिवैकली च स्यात्। श्लोकपाठनापेक्षया कादम्बरीवासवदत्तादशकुमारचरितादिगद्यप्रबन्धपाठनमन्यादृशबुद्धिविकासजनकमिति वयमाशेमहे। तेन वाक्यरचनानैपुणी च सम्पद्येत। तत्तद्विषयमर्मपरिज्ञानं च भवतीत्यनुभवसाक्षिकमर्थमाचक्ष्महे वयम्।

प्राज्ञाः! प्रायश आधुनिकप्रबन्धानामशेषाणां श्लोकजटिलतया प्रथमतस्तदध्यापनमसाम्प्रतमित्याभात्यस्माकम्। न हि तथा करणेन त्वरया विकासो मनीषायास्समुदेति। किञ्च परबोधनमनधीतश्लोकार्थपरिज्ञानञ्च परस्ताद्दुश्शकम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूगोलदेशचरित्रादिनिबन्धपठनं वृथा कालयापनायैवेति सम्भावयन्ति केचित् । यतस्तत्तु भाषाज्ञानस्यानुपयुक्तम् । अथापि शैशवे तत्र यदि किञ्चित्स्यात्परिचयः, परस्तात्पाण्डित्यदशायाम्परमुपयोगाय कल्पेत । पठनाचिन्तनाद्यपेक्षया परबोधनम्पाण्डित्यापादकमिति दृढमिदमवधत्त ।

किञ्च, प्रश्नप्रत्युक्त्यादिषु सामर्थ्यसम्पादनं च मतिविकासकमिति भावयामः । इदमाद्यशेषनीतिविदावनुभवशालिनौ च तौ सुमतिसुनीती सुन्दरमिममचिरेणैव तन्त्रतस्समुदतारयताम् । अनन्तरं च सुमतिस्सुन्दरेण पूर्वमानीतलेख्यस्यैवं विलिख्योत्तरम्प्राहैषीत् ।

"मान्यमहाशयाः ! युष्मत्प्रहितपत्रिकायाः प्रतिलेखनस्यायमेव समभवत्समीचीनस्समुचितश्च समयः । भवत्पत्रावलोकनोत्तरक्षण एव प्रतिलेखाननुप्रेषणं न दोषतया भावनीयमिति साञ्जलिबन्धमभ्यर्थये ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्किंचिदपि वा सम्भ्रमेण कर्तुं न मेऽभिमानः। न च तथा करणम्मयि साम्प्रदायिकम्। दीर्घालोचनापुरस्सरम्मेव सर्वं कर्तव्यमिति मे हृदयम्। तदेव समञ्जसमिति च किमनेन। प्रस्तुमः प्रस्तुतम्। युष्मत्कुमारमुद्दिश्य नैतावदवधि किमपि लेखनीयमासीत्। साम्प्रतमुदियाय मे धीरता लेखने। मानुषस्य बुद्धिर्नास्तीति यत्तदखिलम्पामरभाषितम्। परं मतितैक्ष्ण्यं नास्तीति यद्यपि वक्तुं शक्यम्। आयुधानां तैक्ष्ण्यायोद्यमकरणवन्मतेरपि तैक्ष्ण्यायोद्युक्ते भवेदेव तदिति नैतच्चित्रम्। बालानां शैशवे पाठशालास्वसंयोजनमनध्यापनञ्चापायसाधनमेव। अतीतकालस्येतः परमनागमिष्यत्तया तावान् कालोऽपि वृथैव खल्वतीयाय। बालिशानां स्वतो बुद्धिर्गोलिकागोलरेखाक्रीडादिदेवनेषु परं सज्जति, न तु पठने कदापीति प्रत्यक्षलक्ष्यमिदम्। मधुरानपि पदार्थांस्तद्वृत्तिरुचेर्मनस्यवगाहनमन्तरा न भुञ्जत इति च प्रत्यक्षतः प्रपश्यामः। एवमेव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्यानिष्ठमाधुर्यं यावन्नावगाहते हृदयं तावद्बालानां स्वत एव तत्र रुच्यजननस्य सांसर्गिकतया सामवादैः कणशः कणशस्तत्र प्रवर्तनीयास्ते पितृभ्याम् । एतदादिविषयानभिज्ञैर्वा जानद्भिरपि उपेक्षावद्भिर्वा भवद्भिरदसीयबाल्यसमयोऽतितरां वृथैवातिवाहितस्सम्पन्न इति सुदृढं ब्रूमहे । श्रद्धापुरस्सरं परिश्रान्ते दुर्लभान्यपि वस्तूनि सुलभान्येव भवेयुरिति ममायं शाश्वतो भावः । युष्मच्चिन्तितप्रकारेण सुखाधानविषये यथा च नाविर्भवेद्वैकली तथा प्रवर्तितस्सन् भवदीयतनूभवस्सोमसुन्दरो मेधावी, सत्यवादी, विस्रम्भभाजनम्, देहमनोदार्ढ्यशाली, सद्विषयसारवेदी, कृतज्ञताजन्मभूरिति च यथा प्रशस्येत, तथा समुत्तार्य (माणो) सौ यस्मिन् कृत्ये समादेष्टव्य इति चिरादभिप्रयन्ति भवन्तस्तत्र विचित्रतरचातुरीशाली, जनोपकारैकचिन्तकस्सर्वप्रशस्यचारित्रः, पाठशालाप्रख्यातिप्रकर्षसम्पादको, भवद्धृदयकमलसहस्रांशुश्चाचिरादेव सत्यमात-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्येत । इदमादिभारो मामकीन एव । सकलजनकुशलनिरतो भगवान्परमकारुणिको लक्ष्मीपतिर्मामकमनोरथं कात्स्न्र्येन पूरयतु ।

हरिपुरम्–
वाणीवैजयन्ती-
पाठशालातः ।
1–12–836

इति भवत्प्रेमपात्रम्.
सुमतिः ।
Head Master of "Vanee Vaijayanthi Patasala"

इति ।

प्रेष्ठाः ! बहुग्रन्थपठनसम्पाद्यमानाधिषणापेक्षया विविधपुण्यकथाश्रवणजं ज्ञानं चिरकालावस्थायि लोकोत्तरञ्च स्यात् । किंचिदधिगतस्वबुद्धिकानाङ्कुमाराणामीदृशकथाश्रवणेन यथा भवेन्मतिविकासस्तथा करणमेव सुतरामुचितम् । अनेकान् संवत्सरान् पठित्वा प्राप्तव्यं महाज्ञानं षड्भिरेव खलु मासैः पञ्चतन्त्रकथाश्रवणेनाधिजग्मू राजकुमाराः । साधारण्येन कथापरिकीर्तनमात्रेण न संजायेत बालकानाम्मतिनैर्मल्यम् । परन्तु तद्व्यक्तीभव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्नीतिनिकुरम्बं तत्रत्यान् कांश्चन सारांशांश्च तत्रतत्र प्रदर्श्य मतितैक्ष्ण्यं सम्पादनीयम्। विविधकथाभिर्नीतिक्रमेषु मतिविकासभजनवदुपन्यासैश्च सरससरलैर्विकसति मतिः। उपन्यासो नाम ज्ञानोत्कर्षापादकेषूपायेषु प्रधानोपायः परिगणितः। सोयं पूर्वकालापेक्षयाऽस्मिन् काले समस्ति समधिगतमहाप्राबल्यः। श्लाघ्यते चायं महाज्ञानजनकत्वात्साम्प्रतम्।

यदि कश्चित्प्राज्ञो घण्टात्रयपरिमितं कालमुपन्यासं चिकीर्षुस्स षड्भिर्मासैर्बहूनुपयुक्तान् ग्रन्थान् सम्यक्परिशीलयेत्। स्वोपन्यासपद्धतिरीदृशीति प्रथमतो निर्णीय तत्रतत्रोपपादनीयान् विषयाननेकान् दुरूहान् भूयोभ्यो ग्रन्थेभ्योऽन्विष्य समाहरेत्। क्वचिदुपन्यासे प्रतिपादितान्विषयानुपन्यासान्तरेऽप्रतिपाद्यनव्यनव्यान्विषयान्प्रतिपादयितुमादशवत्सरः परिश्रमो धार्य इति वयमभिप्रेमः। तावत्प्रयत्नशाली सर्वानपि विषयानातिसामर्थ्येन समुपन्यस्येत्सुविमलमिति नात्र विशयकणिकाऽपि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आस्माकेषु 'उङ्कार' इति काचन दुष्क्रिया प्रथते। जानन्ति खलु तां सर्वेपि सुहृदः। एकैकोपि पुरुषस्सल्लॉपे कथाकीर्तने वा पुरोवर्ती "ॐ ॐ" इति वदन्नेव तिष्ठेत्। स एष ॐकारः परिकीर्तितः। एवमुङ्कारेऽनाकलिते नूनमुपरमेदनुपदमेव कथा सल्लाँपश्च। इदमभावे पुनरास्माकाः कथाः परिकीर्तयितुं सल्लॉपितुं वा सत्यमतितरां क्लिश्यन्ति। चिकीर्षितोपन्यासः पुरुषः प्रथमतो, मध्येमध्ये ॐकारमन्तरा कथाप्रकथनपाटवमार्जयेत्। एतस्मिन्द्धौ स परिज्ञातोपन्यासचतुर्थांश इति सुवचम्।

विद्यार्थिनामधीतोपपादनावसरे कतिचिदध्यापका उङ्कारपूर्वकश्रवणं साम्प्रदायिकमकुर्वन्। भवति तावदिदमनेकविधानामसन्दर्भाणान्निदानम्। विद्यार्थिनां निर्दोषम्। पाठोपपादनावसरे, गणितप्रतिपादनसमये, अवसानसमये, अधीतपाठस्य दुष्टतया प्रतिपादनसमये च देशिकीयानुङ्कारस्वरानभ्यासतः परिजानन्ति विद्यार्थिनः। अतस्ते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बुद्धिहीना विविधाकमभाजनानि च भवेयुः । एतन्निदर्शनतया कस्यांचित्पाठशालयां प्रवृत्तां कामपि कथामत्र संक्षेपतस्सङ्गिरामहे ।

भवानीनामके क्वचिदग्रहारे पावनो नाम कश्चिदुपाध्यायोऽवर्त्तत । तदीयशालायां भूयांसो विद्यार्थिनः पठन्तश्चावर्तन्त । स कदाचित्तेष्वन्यतमं मदननामानं विद्यार्थिनमाहूय "वत्स ! मदन ! ! मया भवान् सङ्कलनव्यवकलनाख्यगणितद्वयं सम्यगभ्यासितः खलु । अतस्त्वं तातपादसनीडमुपगम्य विशदमावेद्येमं वृत्तान्तं वेतनमादायायाहि" इत्यभिधाय तम्प्राहैषीदगारम् । स च स्वजनकं समया समुपेत्य "उपाध्यायाय प्रदेयं यावद्वेतनन्देहि" इति बहुशो निरबध्नात् । पिताऽब्रवीत् । वत्स ! "त्वमेतावता सम्भ्रमेण मां वेतनाय निर्बध्नासि खलु, उपाध्यायस्त्वां कियतीं कलामबोधयत्" इति । मदनः प्रत्यभाषत । "सङ्कलनव्यवकलनगणितद्वयमाशिक्षि सम्यगेव"

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति। इदमाकर्ण्य जनकः परमानन्दभारितान्तःकरणस्तनयमालिङ्ग्य "वत्स! मदन!! पञ्चभिरष्ट सङ्कलय पश्यामः" इति सादरमभाषत।

बालः—"षट्, सप्त, अष्ट, नव, दश, एकादश, द्वादश, त्रयोदश, चतुर्दश, पञ्चदश," (इति तातमुखमवलोकयन्नेव गणयन्नास।)

पिता—अवलोकितं सङ्कलनसामर्थ्यम्। व्यवकलय पश्यामः।

बालः—सन्नद्धोऽस्मि। आज्ञाप्यताम्।

पिता—नवभ्यश्चत्वारि व्यवकलय।

बालः—"अष्ट, सप्त, षट्, पञ्च, चत्वारि, त्रीणि, द्वे, एकम्"(इत्यभिधाय उपरिगणिताभावाज्जनकवदनमवलोकयँस्तूष्णीमवर्तत।)

पिता—(सप्तनोव्यथम्) भवदुपाध्यायम्मद्वचसैवङ्कथय। "रात्रौ श्रीमतोऽस्मद्गृहागमनाय प्रार्थयेऽहम्"

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति । स च तथैवात्रागमिष्यति । तदा प्रत्यक्षत एव तत्करे वेतनन्दास्याम इत्यभिधाय कुमारं प्राहिणोत्पाठशालाम्।तदनु तत्प्रार्थनानुरोधेन रात्रौ भोजनानन्तरमुपाध्यायः पावनो मदनागारमायासीत् । तदात्वे च तमन्वयुङ्क्त मदनजनकः । "अस्मत्पुत्रो मदनः किमभिजानीते" इति । उपाध्यायः प्रत्यवोचत् । "सङ्कलनव्यवकलनाख्यगणितद्वयम्" इति । पिता पुनरप्राक्षीत् । "सम्यग्वदति वा परीक्षितः" इति । पावनोऽब्रूत । "युष्माभिः परीक्ष्यतामद्य । वदति नेति तदा स्वत एव व्यक्तीभवति " इति ।

पिता—वत्स ! मदन ! ! अष्टाभिश्चत्वारि सङ्कलय ।

बालः—(उपाध्यायमुखमवलोकयन्नङ्गुलिपारित्यागपुरस्सरं गणयितुमारेभे ।)

उपा—किमहो ! (इत्युत्साहयति ।)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालः—पञ्च,

उपा—ऊम्

बालः—षट्,

उपा—ऊम्

बालः—सप्त,

उपा—ऊम्

बालः—अष्ट,

उपा—ऊम्

बालः—नव,

उपा—ऊम्

बालः—दश,

उपा—ऊम्

बालः—एकादश,

उपा—ऊम्

बालः—द्वादश,

उपा—ऊम् उ,

बालः—तात ! द्वादश ।

पिता—वत्स ! षड्भ्यश्चत्वारि व्यवकलय ।

उपा—वत्स! मदन !! भवतु ।

बालः—पञ्च,

उपा—ऊम्

बालः—चत्वारि,

उपा—ऊम्

बालः—त्रीणि,

उपा—ऊम्

बालः—द्वे,

उपा—ऊम् उ,

बालः—तात ! द्वे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिता—मया मध्याह्ने परीक्षितस्त्वन्नावदः किल सम्यगुत्तरम् । कुतः ? ।

उपा—अद्य सम्यगवादीत्किल ।

पिता—अथ किम् ।

अथोपाध्यायो वेतनं समोदम्प्रतिगृह्य गृहानयासीत् । अयि ! मया वृताः पण्डिताः ! ! उपाध्यायस्य उङ्कारेण सम्प्रति मदनेन सम्यगुत्तरमभाणि । पितुः प्रातः परीक्षाकाले उङ्कारविरहान्न सदुत्तरमभ्यधायि । तस्माद्विद्यार्थिनामधीतोपपादनावसरे देशिकानामुङ्कारस्सत्यमत्यक्रमिकस्सम्प्रदायः ।

परञ्च, अध्ययनाऽधीतोपपादनाद्यवसरेषु बालानां विविधाङ्गचेष्टाकरणस्य सहजतया तदुपाध्यायैरवश्यं खण्डनीयम् । अन्यथा, ते युक्तेपि वयसि सभायामुपन्यासकालेपि विविधान्यङ्गचेष्टितानि कुर्युर्नूनम् । भूयांसोवयोवृद्धा अद्यापि श्लोकभावविवरणसमये कठिनविषयविवृतिसमये च किंचिद्गगनमवलोकयन्तस्सविलम्बम्भाषन्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति प्रत्यक्षदृश्यमानमिदं नापलपितुं शक्यते । तत्तावत्तेषां बाल्यकृतदुरभ्यासप्रयुक्तमेवेति नात्र सन्देहः। अत्रेदं किञ्चिदवधत्त ।

काञ्चीपुर्यां दिवाप्रदीप (पह्लदीपट्टि) वेङ्कटाचार्यो नाम कश्चन पण्डितमणिरवर्तत । स तु श्रीदेवराजस्वामिदेवस्थानान्तःपातिशतस्तम्भमण्डपे प्रत्यहं विद्यार्थिनस्तर्कशास्त्रमध्यापयन्नासीत् । कदाचित्तदीयविद्यार्थी कश्चित्करेण कामपि वर्तिकां खण्डयन्नवर्तिष्ट । स चायमधीतोपपादनसमयः।उपाध्यायस्तत्पश्यन्नेव तद्वर्तिकाखण्डनावसानोत्तरं कामप्यन्यां वर्त्तिकां तद्विद्यार्थिहस्ते विचिक्षेप।तेन स विद्यार्थी तु"अस्मत्कृतं चेष्टितमसत्"इति परिज्ञाय तच्चेष्टितं तदैव पर्यत्याक्षीत् । अधिगतस्वबुद्धिका वयोवृद्धाश्च विद्यार्थिनस्तन्त्रेण यथोचितम्प्रवर्तनीयाः ।

प्रायशो विद्यार्थिनः पठनकाले देशिकप्रतिप्रकारेण पदार्थान्विवेचयन्ति । तात्पर्यमुपपादयितुमत्यर्थं क्लिश्यन्तीति साक्षात्कुर्महे । बाल्ये क्लेशेन श्रद्धया च गाथानाम्पद्याना-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्च स्फुटतया सहृदयहृदयाह्लादकतया च भावविवरणे सम्पादितनैपुणीकाः पुरुषाः पश्चात्पाण्डित्यदशायां स्वीयविद्यार्थिनो बोधयन्ति सुखेन भावमिति नेदं रहस्यम् ।

बाल्ये तन्द्रालुभावेन सामर्थ्याभावेन सङ्कोचेन लज्जया वा कदापि मुखतोऽनाकलितभावविवरणाः पुमांसो नूनमुपाध्यायतादशायां भावमतिविपर्ययेण बोधयन्ति विद्यार्थिन इति नैतदपि गूढम् । अतश्च भावविवृतिविषये पाठयितृभिः"बालिशा एते सम्प्रति किमर्थमत्र हिंसनीयाः, युक्ते वयसि स्वत एव भावं सुष्ठु परिज्ञास्यन्ति" इति न पराङ्मुखैर्भाव्यमिति हृदयमान्तरमास्माकम् ।

पाठशालासूपाध्याया विद्यार्थिनो यथा निर्बध्नन्ति पठनाय चिन्तनायै च, तथैव तैस्ते परस्परं प्रश्नप्रत्युत्तारिकादिविधानाय च निर्बन्धनीयाः प्रत्यहम् । अन्यथा ते पठितचिन्तितविषयातिरिक्तमन्यं न कमपि विषयं प्रतिपादयितुं शक्नुयुः । नवीनै राजकीयपरीक्षाधिकारिभिर्युक्तिप्रश्नाः कृताश्चेत्तानुत्तरयितुमशक्नुवाना दिग्भ्रान्तास्तिष्ठेयुः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राजकीयपाठशालापरीक्षाधिकारी (School-Inspector) काश्चन पाठशालाः परीक्षितुमारेभे । तदाऽस्माभिः प्रत्यक्षीकृतङ्कमपि विषयमत्र संक्षिपामः । तेन परीक्षकेण कमपि श्लोकमनुयुक्तः कश्चन बालः श्लोकपदविभागार्थान्प्रतिपाद्य विरराम । भावविवरणाय कृतनिर्बन्धस्स "न मया ज्ञायते" इति निर्भयं निस्सङ्कोचञ्च प्राचकथत् । स तेन बहुधोत्साहितोपि, तद्वदनान्न निर्जगालैकमप्यक्षरम् । एतदवेक्षमाणोन्यः कश्चन बालको "मयोच्यते तात्पर्यम्" इति वक्तुमारभ्य सोपि मध्ये विरतिमुपेयाय । अन्यः कश्चन तच्छेषमपूरयत् । ततश्च कियतः कालादनन्तरं तमेव भावं संक्षेपतः प्रतिपाद्य "एतद्भावप्रतिपादकश्लोकं वदत" इत्यादिष्टेषु बालेषु नैकेनापि मौनव्रतं नाङ्गचकारि । तच्छ्लोकादिमपदप्रतिपादनानन्तरं सर्वेपि बाला विनैकमपि दोषं श्लोकन्तमान्तम्प्रतिपादयामासुः ।

नळवेण्बा, वाग्विधायि (वाक्कुण्डान्) न्यादिगाथाः क्रमेण चिन्तयन्तः केचन बाला गाथान्तिमचरणमभि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धाय "एतत्पादान्त्यकगाथामाख्यात" इत्याख्यातास्तदनुपदगाथां कथयन्ति परं न तु तत्पादान्तकगाथामचकथन्। चिन्तितप्रकारेण पर्यायत एव गाथाप्रतिपादनशीलः कश्चन बालो मध्ये कंचनविषयमनुयुक्तः। स चादिमगाथामारभ्य क्रमेण गाथाः प्रतिपादयति परं न तु मध्येऽनुयुक्तं विषयम्। अतश्च "पाठशालासु प्रत्यहं प्रश्नप्रत्युक्त्यादिविधानानभ्यासत एवैतादृश्यो न्यूनतास्सम्पद्यन्ते" इति नियतमिदमनुभवसाक्षिकमेव।

किञ्च, "अस्मिन्दिने पठितः पाठः परेद्यवि पुस्तकावलोकनमन्तरैवावश्यम्प्रतिपादनीयः। नो चेदनेनैव वेत्रेण चर्म वः पृष्ठस्य मोचयित्वा लवणलेपमाकलयिष्यामि" इति बिभीषिकामृते बालका न पाठं चिन्तयन्तीति सर्वे वयम्प्रत्यक्षत एव पश्यामः। कतिचन वेतनमात्रप्रतीक्षिणोऽध्यापकास्तन्द्रापारवश्याद्विद्यार्थिन एवमनिर्बध्नन्तो दृश्यन्ते। सुतरामिदमनुचितमाकलयामहे वयम्। एतद्वि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दर्शनतया कांच्यामस्याम् "उभयवेदान्तवर्धिनी" संज्ञकपाठशालायाम्प्रवृत्तां कामपि कथामत्र निरूपयामः ।

शालायामस्याम् "भूसारपुर" (तिरुमळिशै) "नरसिंहाचार्य" नामा कश्चन पञ्चविंशतिवयस्कः पुरुषोऽध्यापकपदवीम् । (न केवलमुपाध्यायपदवीम् । अपि त्वध्येतृपदवीञ्च ।) तत्सकाश एव कंचित्कालमस्माकं 'रघुवंश' पाठस्समजनि । कदाचिदपि सोयं न समभवत्स्वकर्णाकर्णितास्मदधीतोपपादनः । प्रत्यहं पाठप्रवचनमात्रेण चरितार्थोऽवर्तत । एवं स्थिते कदाचिदेतत्पाठशालाध्यक्षाः "श्रीश्रीशैलानन्तपूरुषश्रीनिवासार्याः" तन्त्रचतुष्टयपारावारपारीणास्तद्वत्सरान्ते परीक्षकपदवीमधिरुरुहुः । तदाऽदसीयान् प्रश्नान्नरसिंहाचार्यविद्यार्थिषु नैकोपि प्रत्युत्तरयां-

स्त कंचित्कालं तात्कालिकतयो (Acting) पाध्यायप-

(१) सेयं पाठशाला वत्सरचतुष्टयात्पूर्वमुच्छिन्ना गैर्वाण्या दौर्भाग्यं सूचयति ।— (२) त इमे श्रीनिवासार्यास्त्रैलोक्यप्रसिद्धवैदुषीकाः । कांचीवासिनः । चतुर्ष्वपि शास्त्रेषु अद्वितीयमसाधारणं च पाण्डित्यम् । (हयग्रीवपुनरवतारभूताः) ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चक्रे।एतच्च प्रागुक्तनिर्बन्धाविधानप्रयुक्तमिति निश्चितवन्तस्तेऽध्यक्षाः कुपितकुपितास्तमुपाध्यायपदवीत उदमोचयन्। अत आवश्यक एवायं निर्बन्ध इति वयमभिसन्दध्महेऽनुभवशालिनः ।

कतिचन विद्यार्थिनः पाठशालायां, गृहे च प्रत्येकं (प्रैवेट्)पठन्तः पाठशालीयपाठम्परं चिन्तयन्तस्स्वसतीर्थ्येषु प्रथमपदे सम्भाव्यन्ते । गृहे प्रत्येकशः पठितपाठं पुनस्सकृदपि अनुद्वीक्षमाणाश्च दृश्यन्ते ।

तत्तद्दिनपठितपाठानतन्द्रश्चिन्तयतां विद्यार्थिनान्तु कदापि कुत्रापि न क्वापि न्यूनता सम्पद्येत । अनीदृशास्तु भवन्ति बहुलतमासन्दर्भभाजनानि ।

कामप्येनां कथाम्प्रकृतानुबन्धिनीङ्कर्णे कुरुत मनसि वा महाशयाः ! ।

हरिहरपाकाख्ये कुत्रचिदग्रहारेऽनन्तशर्माभिधानः कश्चन सर्वज्ञ उपाध्यायपादस्तद्देशीयानन्यदेश्यांश्च बहून् बालानध्यापयन्नासीत् । तेष्वन्यतमः कश्चन सुन्दरनामा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्यार्थी कदाचिन्नव्यपाठे पठनीयेऽधीतचरमेव पाठम्पुनः पठितुमुपाक्रमत । अनुपदमेवोपाध्यायस्सान्तररोष एवमाचख्यौ । "तात ! सुन्दर त्वमसि सुतरां व्युत्पन्नः । इतः परं मत्सकाशे पठितव्यं न किमप्यस्ति भवतः । तद्गेहं प्रति गम्यत। तावत्" इति सपरिहासम् । पठितापठितयोरभेदज्ञानमेव खलु व्युत्पत्तिलक्षणम् । अपठितस्य पठितप्रायतेति फलितोऽर्थः । सुन्दरोयं पठितमप्यपठितमेवामन्यत । अत्र च किन्निदानमिति जिज्ञासायां पूर्वेद्युः पठितपाठस्य पुनस्सकृदपि चक्षुषाप्यनवलोकनमित्येव वक्तव्यं भवति । अतश्च तत्तद्दिनपाठान्विद्यार्थिन उपाध्यायसमक्षमेकीभूय यथा च चिन्तयेयुस्तथा प्रयतितव्यमध्यापकैः। इदमुपलक्षणम् । पठनावसरे विद्यार्थिनो यथा च पाठैकदत्तावधानाः कार्यान्तरानासक्तचित्ताश्च वर्तेरंस्तथा विधानमप्युपाध्यायकार्यम् ।

प्रेष्ठाः ! पाठानवहितमधिकृत्य च कामपि पुराणकथामत्र संजिघृक्षामः । सावधानमाकर्ण्यताम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुत्रचिन्नगरे कस्याञ्चन पाठशालायां कश्चिद्विद्वान् बहूनध्यापयन्नास्त । विद्यार्थिष्वन्यतमः कश्चन प्रत्यहं पाठावसरे तावदूर्ध्वमुखस्सन् उपरि किमपि बिलम्प्रविष्टवतो मूषकस्य बालमात्रं बहिर्लम्बमानमवलोकयन्नासीत् । पाठयिता " अरे ! ज्ञायते वा ? " इति पृच्छति चेदयम्बालो मूषकबालमधिकृत्य पृच्छतीति मत्वा "ज्ञायते" इति प्रत्युत्तरयन्नासीत् । एवं स्थिते, कदाचित्तन्मूषकबालोऽपि बिलान्तः प्राविक्षत् । तस्मिन्दिने देशिके "ज्ञायते वा ?" इति पृच्छति सति सोयं "न ज्ञायते" इत्युदतरयत् । उपाध्याये तु " किमरे ! एतावता कालेन मयोक्तान् दुरवगमानपि विषयान् ज्ञातानवादीः, अस्मिन् दिने किमिममल्पीयांसं विषयमनभिज्ञातमाकलयासि ? " इति परिपृच्छति,सोयं यथाजातशिखामणिः—"स्वामिन्!उपरि दृश्यताम् । (अंगुल्या प्रदर्शयन्) तस्मिन् बिले कोप्याखुरन्तः प्रविष्टो बहिः प्रसारितबालमात्र आसीत् । अतस्सबाल एतावता कालेन मच्चक्षुषा ज्ञायमान आसीत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्मिन् दिने तु बालोप्यन्तः प्रविष्टः। अतो मया न ज्ञायत इत्युक्तम्" इत्याचचक्षे। (विस्मयावहा खल्वियं कथा)।

मान्यमहाशयाः ! ईदृशबालकानामध्यापकस्य का वा गतिः ?। एतादृशेषु विद्यार्थिषु कतमो वा विद्यार्थ्युत्तीर्य "अहं तस्य विद्यार्थी" इति बहिरवतीर्य पण्डितराजसभासु प्रतिगृह्य पारितोषिकमुपाध्यायस्य कीर्तिसम्पादको भवेत ?।

वेतनग्रहणमात्रपरायणा उपाध्यायास्तात्कालिकदेहयात्रांवरं लभन्ते, न तु यथोत्तरम्प्रातिष्ठां कीर्तिञ्चेति दृढमिदमवस्थाप्यतां हृदि। धर्मबुद्ध्या पाठप्रवचनमारचयतां कृत्स्नोपि परिश्रमो न मात्रयापि वैयर्थ्यमधिगच्छेत्। यादृश्यनेनोपलभ्येत कीर्तिर्न तादृशी नूनम्महावदान्यचूडामणिनापि। किम्बहुना प्रकथनेन। वेतनमात्रप्रतीक्षिणामध्यापकपाशानां न परस्मिँल्लोके गतिरुत्तमा सम्पद्येत। "ऋतं च स्वाध्यायप्रवचने च, सत्यं च स्वाध्यायप्रवचने च" इत्यादिश्रुत्या, "अध्यापनं चाध्ययनं यजनं याजनं तथा" मनु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महर्षिणा च ब्राह्मणानामध्यापनमपि कार्यत्वेन व्यधायि। न च वयं वेतनग्रहणं नाभ्युपगच्छामः। किन्तु, तदेकप्रतीक्षिताम्। ततश्च धर्मपाठकान् वयमतितरां बहु मन्यामहे।

"पाठशालासूपाध्यायस्य विधेयीभूयाध्येतृभिर्बालकैर्न देहरामणीयकादिविषयेषु बुद्धिप्रसारणं कार्यम्। न च रात्रौ सुखशायिकायां शयितव्यम्।" इति कृतनिर्बन्धस्य कस्यचिदुपाध्यायस्य सकाशे कश्चिद्धनिककुमारस्स्वपित्रा पठनार्थं दूरदेशादनुप्रेषितः। स तु कुमारः पदेपदे "नाहं सम्यगद्य निद्रामि" इति निजतातपादाय विलिखन्नासीत्। तदीयौ पितरौ तु वत्सो विद्यावैयग्र्येण सम्यङ् न निद्रातीति मन्यमानाववर्तेताम्। स तु कुमारः पाठशालातस्समागत्य भवनं पुस्तकं न स्पृशति हस्तेनापि। पुस्तकानि कुर्वन्नुपधानपदे सदा निद्राति परं न तु करोति कार्यान्तरम्। कियतश्चन कालादनन्तरमयम् "सम्यगद्य निद्रामि" इति व्यलेखीत्पित्रे। तदा पितरौ वत्सोऽधुनाऽ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्तरेणैवातिपरिश्रमं गृह्णाति विषयान्,द्रढयति च मनसि तान् विनैवात्यन्तचिन्तनामिति मत्वाऽमन्दमानन्दमविन्देताम् ।

कदाचिद्विरामसमये कुमारोयं पुराणपुस्तकान्याखिलान्यपि गृहीत्वा जगाम स्वदेशम् । पितरौ तु तं महता प्रेम्णा बहुमन्येताम् । अदसीयपाट्वावजिगमिषौ पितरि "वत्स ! किञ्चित्पठ ! वत्स ! किंचित्पठ" इति बहुशोऽभ्यर्थयति सति (कुमार) जननी पुत्रवात्सल्येन "पाठशालायामनुभूयमानः क्लेशः किन्न पर्याप्तः । सकृदत्रागतश्चेदत्रापि किम्पीडनीयः" इति क्रन्दितुमुच्चकैरारभत । पिता च भार्याया बिभ्यद्विरराम प्रार्थनातः ।

:सोयमलङ्कारविद्यार्थी यावदत्रावसत्तावत्प्रतिबान्धवगृहमेकैकन्दिवसम्मृष्टान्नमुपभुञ्जानस्सुखेन कालमतिवाहयन्नासीत । नायमत्रापि कदापि पुस्तकमदीधरत्पाणिना । किंसधिकेन । आगमनावसरे समानीतम्पुस्तकबन्धमविस्रंसयन्नेव महति पर्यङ्के शयानः कालमत्यवाहयत् । चिराद्विप्रोषितस्तदात्व एव स्वदेशमागतः कश्चन विद्याविलासना-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मा तमेनम्बाल्यवयस्यं दिदृक्षमाणस्समागमददसीयमगारम् । तदा किलायं स्वकीयशयनागारे सुखं शयानोऽवर्तत । नवीनोयमुपगम्य तदुपकण्ठम् "अयि ! सुहृन्मणे ! विद्याविलासजीवितभूत ! अपि यथासुखमस्वाप्सीः" इत्यनुयुञ्जानस्सौखप्रसुप्तिकोभूत् । स तु तन्द्रालुशिखामणिः "सखे ! मदीयपुस्तकबन्धे सति समधिगतसुमहत्त्वे का वा सम्भाव्यते न्यूनता सुप्ते" इति प्रत्यवादीत् । समीपस्थ एव तत्पिता निशम्येदं वचनमतितरान्दुर्मनायमान एतत्तत्त्वबुभुत्सुर्नव्यकुमाराय नेत्रेङ्गितम्प्रैरयत् । स तु हृदयमदसीयमवगत्य तं सुहृन्मणिम्पाठोदन्तमनुयोक्तुमारेभे । अन्ततस्सर्वमपि तदीयं तत्त्वं व्यक्त्यभवत् ।

कश्चित्स्वदेशात्परदेशम्पठनाय गत्वा यद्यपि तत्र न किमपि पठेत्तन्द्रापारतन्त्र्यात्तथापि तस्य सर्वज्ञ इति नामधेयं सुलभमेव स्यात् । पार्श्वस्थाश्च पामराः "तम्पश्य, तद्वत्त्वयापि किन्न पठनीयम् ।" इति स्वस्वतनूभवान् क्रूरक्रूरमधिक्षिपेयुः । "स किञ्जानाति । तन्द्रावग्रेसरः खलु,"

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति परैरभिज्ञैस्तत्त्वं कथितमपि न प्रतियन्ति पामराः ।

एवमेवामुं धनिककुमारं पण्डितप्रकाण्डममन्यंत पूर्वं सर्वेपि । पिता तु "अद्यैव पुत्रयोग्यता कणशः कणशो व्यक्तीभवति" इत्यमन्यत ।

प्रथमतो "नाहं सम्यङ्निद्रामि" इति, पश्चात् "अद्य सम्यङ्निद्रामि" इति च विलिखितवतः कुमारस्याऽऽशयं नाद्याप्ययमवागमत् । प्रथमतः पुस्तकबन्धस्याल्पीयस्त्वात्तस्योपधानतायोग्यताविरहादनुभूतासुखप्रसुप्तिरूपक्लेशस्य पश्चात्पुस्तकबाहुल्यात्तद्बन्धस्योपधानतायोग्यतासम्पत्त्या विनाशात् "अद्य सम्यङ्निद्रामि" इति व्यलिखत् । अहो ! कोयमभिप्रायोस्य कुमारस्यान्यादृशः ।

एतत्तत्त्वव्यक्तीभावानन्तरं तदीययोर्मातापित्रोस्समुत्पन्नन्दुःखं शक्यमनुमातुम्पाठकमहाभागानामेव । न वयम्पारयामस्तदनया विलेखिन्या विलेखितुमंशतोऽपि ।

पाठकाः ! पश्यत ! मातृपितृपुत्रदेशिकाः किम्फलमधिजग्मुः ? । अपराधोयम्मुख्यतया कस्य पुनः केन वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिरसाऽभ्युह्येत ? । अन्तत उपाध्यायेन खलु भवत्यधिवाह्यः । बालकानां विद्यायामश्रद्धा स्वाभाविक्येव । पितरौ तु पत्रावलोकनेन केवलेन मुग्धावभूताम् । अध्यापकस्याजागरूकतया चैवं सम्पन्नम् ।

अयि ! अध्येतारो ! बालकाः ! एवंविधाः पाठशालाविषयिण्यः कथा बह्व्यो हि विद्यन्ते नाम । एतासामवगमनम्भवादृशां विद्यार्थिनामुपाध्यायानाञ्चात्यावश्यकम् । इतोपि वक्तव्येष्वंशेषु सत्स्वपि भूयस्सु परमेतावत्यमुमुपन्यासमुपरमय्य पुरुषार्थविमर्शमाकलयितुकामास्स्मः । तत्ससंभ्रमयामस्तूलिकाम् ।

पाठकाः ! जागृत ! जागृत ! अवधत्त । प्रत्यभिजानीत सोमसुन्दरम् । यतस्तमेवाधिकृत्य पुनः किञ्चिद्वक्ष्यामः ।

स चायं सुन्दर उपाध्यायचातुर्याद्वत्सरेण पठनीयं पाठम्मासत्रितयेनैव पपाठ । सुनीतिसुमती द्वावपि सुन्दरेऽस्मिन् परमां प्रीतिमारोपयताम् । तयोस्संसर्गेण विविधा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिश्च सद्विषयबोधनाभिर्नास्य मनो मात्रयापि प्रववृते दुष्पथे दुश्चेष्टितेषु वा । चतुर्ष्वपि शास्त्रेषु नीतिग्रन्थेषु चाद्भुतम्पाण्डित्यमुपेयाय । सभासु चाग्रासनाधिपत्यमाधिजगाम । पुपोष च परमानन्दम्पित्रोरिव सर्वेषामपि दर्शकजनानाम् ।

अतश्च, बाल्य एव पुत्राभिवृद्धिकांक्षिभ्याम्पितृभ्यां पुत्राः परमप्रेमभाजनान्यपि कस्यचिदुपाध्यायस्य हस्ते समर्पिता वशीकृतभारतीकाः कारयितव्या इति सर्वैरपि जनैरवगन्तव्यमियदेव ।

"मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम् ।
कीर्तिंश्च दिक्षु विमलां वितनोति लक्ष्मीं
किंकिं न साधयति कल्पलतेव विद्या ॥"

वृष्णिवंशैकरत्नाय कृष्णाय परमात्मने ।
कुर्वे नमांसि भूयांसि भक्तसर्वार्थदायिने ॥ १ ॥

श्रीकांचीपरवादिभीकरगुरोर्वंशेऽभवद्यस्सुधी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रङ्गार्याह्वयभूषितो जलनिधे राकाशशाङ्को यथा ।
तत्सूनुस्तदनुग्रहात्तधिषणालेशः प्रबन्धं ह्यमुं
चक्रे सर्वजनोपकारविधये गृह्णन्तु सर्वे बुधाः ॥ २ ॥
अण्णङ्ग्रार्यमहाशान्तो हस्त्यद्रीशापराभिधः ।
बालोपदेशमालाख्यम्प्रबन्धमकरोदिमम् ॥ ३ ॥
सोयं श्रीखेमराजाख्यश्रेष्ठिना कृतबुद्धिना ।
श्रीवेंकटेश्वराख्ये स्वे मुद्रासद्मनि मुद्रितः ॥ ४ ॥

इति श्रीकाञ्चीप्रतिवादिभयङ्करहस्त्यद्रिनाथापर-
नामधेयाण्णङ्गराचार्यमहाशान्तप्रणीता
बालकोपदेशमालिका सम्पूर्णा ।

॥ श्रीकृष्णार्पणमस्तु ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीरस्तु ॥

श्रीरङ्गनाथप्रबोधनप्रबन्धप्रातिकृतिः ।

श्रियै नमः । श्रीमते रामानुजाय नमः । श्रीमते हयग्रीवाय नमः । श्रीवादिभीकरमहागुरवे नमः ।

(श्रीमद्भक्ताङ्घ्रिरेण्वनुगृहीत "तिरुप्पळ्ळियेळुच्या" ख्यद्राविडप्रबन्धानुवादः ।)

श्रीरंगनाथप्रबोधनप्रबन्धप्रातिकृति ।

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरम्मुनिम् ॥ १ ॥
तमेव मत्वा पुरवासुदेवं रंगेशयं राजवदर्हणीयम् ।
प्राबोधिकीं योऽकृत सूक्तिमालां भक्ताङ्घ्रिरेणुं भगवन्तमीडे२

चण्डांशुस्त्रिदशेन्द्रदिश्युदयभूभृच्छृंगमासेदिवान्,
प्रौढं ध्वान्तमभूद्विलीनमुदिते रम्ये प्रभातेऽधुना ।

१ प्राचीदिशि । २ प्राप्तवान् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पाणि स्रवदम्बुशीतलमधून्यासन् पृथूनि स्फुटा[1]-
न्यागत्यामरवृन्दराजनिवहास्संघीभवन्तो मुहुः ॥ १ ॥
तिष्ठन्त्यग्रिमदिक्तटे[2] करिकरेणवादेस्सहामीभिरा[3]-
यातस्यामितगर्जनानि जलधेरुद्गर्जतो वीचिभिः ।
घोषं दिक्ष्वनुकुर्वते[4] तदयि भोः ! श्रीरंगपृथ्वीपते !
भोगीन्द्राधिपभोगरूपशयनादुत्थीयतामञ्जसा ॥ २ ॥

गाथा ॥ १ ॥

प्रातःकालिकमारुतस्सुलतिकासंयुक्तसन्मागधी-
सौरभ्येण सहाभिवाति जलभूशय्यानिषण्णा[5] इमे ।
हंसा नैजमनोहरच्छदततिं संयुक्तहैमाम्बुकां
धुन्वाना विकचीकृताक्षियुगला निद्राञ्च पर्यत्यजन् ३
निम्नद्वारसमाननक्रसुमहद्वक्रीयदंष्ट्राविष[6]-
प्रोत्ताम्यन्निजजीवदन्त्यधिपतित्राणैकबद्धादर ! ।

---

१ विकासितानि । २ दाक्षिणदिशि । ३ आदिनामुरजग्रहणम् । ४ दिक्षु उद्गर्जत इत्यन्वयः । ५ सरोजम् । ६ वक्रेभवा वक्रीया वदनान्तस्स्थेति यावत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीरङ्गोपवनीविहाररसिक ! श्रीरङ्गपृथ्वीपते !
भोगीन्द्राधिपभोगरूपशयनादुत्थीयतामञ्जसा ॥ ४ ॥

गाथा ॥ २ ॥

व्याप्तोष्णांशुमरीचिकास्[1]समभवन् सर्वे प्रदेशा इमे[2]
प्रोद्दीप्तैर्भगणैर्[3]विहीनाकिरणैर्जातं नभोमण्डले ।
ज्योतिष्मांस्तुहिनांशुरप्यातितरां जग्लौ विहीनांशुको[4]
भूयिष्ठं तिमिरं निरस्तमभवच्चण्डांशुभानूत्करैः ॥ ५ ॥
प्रातर्मारुत[5] एष रम्यविपिने सत्पूगपत्रीततिं
भिन्दंस्तत्कुहलीः प्रविश्य परितश्चाघ्राय तद्वासनाम् ।
आवातीह समन्ततस्तदयि भोस्तेजास्विचक्रायुध !
श्रीरङ्गेश फणीन्द्रभोगशयनादुत्थीयतामञ्जसा ॥ ६ ॥

गाथा ॥ ३ ॥

---

१ मरीचिका—किरणः । २ अस्मन्नयनगोचरीभूताः । ३ नक्षत्र-समूहैः । ४ अंशुकपदं श्लिष्टं लोके कोपि मानवो शुकरहितश्चेत् (पटरहितश्चेत्) मुखच्छायाविहीनो ग्लायेत् । तथायमपि विहीनांशुकत्वाज्जग्लाविति । ५ प्रातःकालज इति यावत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुङ्गा बालिशका[1]सरा उपवने गोवृन्दसंचारक-
श्रीमद्गोपजनाननात्तमुरली[2]ध्वानश्च कण्ठे गवाम्[3] ।
घण्टानाञ्चरवो दिगन्तमखिलं व्याप्तास्सरस्स्वंबुभू-
मध्वास्वादनमत्तभृङ्गनिचयोऽधावत्समुत्प्लुत्य च ॥७॥
लंकावासिसुरारिनाशक ! वरश्रीशार्ङ्गराजत्कर !
श्रीदेवाधिप ! गाँधि[4]सूनुमखसंपूर्तिप्रदानोद्यत ! ।
साकेतावसथ ! द्विषद्वधपटो ! श्रीरङ्गपृथ्वीपते !
भोगीन्द्राधिपभोगरूपशयनादुत्थीयतामञ्जसा ॥ ८ ॥

गाथा ॥ ४ ॥

पुष्प्यद्वृक्षवनाक्षितौ शकुनयः कोलाहलं कुर्वते[5]
निश्शेषं प्रययौ निशाऽप्युदभवत्कालोऽर्चनार्होऽधुना ।
उद्घोषैकपटोर्स्ततटिन्यविपतेः[6] प्राच्यामजन्यारवो
मद्यास्वादनमोदमानमधुपैर्झाङ्कारिभिर्व्यापृताम् ॥९॥

---

१ महिषाः । २ मुखवेणुः । ३ गवां कण्ठे वर्तमानानां घण्टानामित्यर्थात् । ४ विश्वामित्रः । ५ चक्रिरे इति वा । ६ समुद्रस्य ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नानाजातिभवैस्सुमै[1]र्विरचितां रम्यां स्रजं[2] निश्चलां[3]
आदाय त्रिदशा[4] भवच्चरणयोस्सेवार्थमत्रागताः ।
तस्माद्भक्तविभीषणोपचरित श्रीरङ्गनाथ प्रभो
भोगीन्द्राधिपभोगरूपशयनादुत्थीयतामञ्जसा ॥ १० ॥

गाथा ॥ ५ ॥

चेतोहारिमहारथोद्[5]वसितास्ते भास्करा द्वादशा-
प्येकादश विष्टपाधिपतयो रुद्राश्च गौरीश्वराः ।
अत्यन्तप्रियकेकिवाहनसमारूढष्षडास्यो महान्
तेऽप्यष्टौ वसवो मरुद्गणगणाः पंचाशदूनैककाः[6] ॥ ११ ॥
आगत्यात्र हि संघशो हयरथा गानैर्मुहुर्नर्त्तनै-
र्वल्लीशेन सहागतास्सुनिबिडा, मेरोस्समेऽत्रालये ।
युष्मत्प्राथमिकाँक्षिपातमधुना काङ्क्षन्त्यतो हे प्रभो
श्रीरङ्गेश्वर! भोगिभोगशयनादुत्थीयतामञ्जसा ॥ १२ ॥

गाथा ॥ ६ ॥

---

१ पुष्पैः । २ मालाम् । ३ अनेन मालायास्स्थूलतरत्वं द्योत्यते । ४ देवाः । ५ महारथवर्तिन इति भावः । ६ एकोनपंचाशत (४९) । कटाक्षम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीरङ्गाधिप युष्मदीयनिलयद्वारोपकण्ठे समं
सर्वैस्स्वैः परिवारकैस्सुरजना अण्डान्तरावासिनः।
निस्संख्या मुनयस्सुदुश्चरतपश्चर्याकुलं मारुतं
स्वीयैरावतहस्तिनाथसहितस्वर्गाधिपो वृत्रहा॥ १३॥
गान्धर्वञ्च कुलं निरन्तरमिदं विद्याधराणां गणो
यक्षाणां निवहो भवच्चरणयोस्सेवार्थमत्रागताः।
जाता मुग्धहृदो नभः क्षितितले जाते च वीतान्तरे
तद्भोगीश्वरभोगरूपशयनादुत्थीयतामञ्जसा॥ १४॥

गाथा॥ ७॥

त्वत्पादाब्जसमर्पणाय कुसुमं लोकोत्तरं सन्निधीन्
आनीय त्रिदशास्समं कपिलया सादर्शमासेवितुम्।
देवं त्वाम्परपूरुषं समुचितैस्सत्साधनैस्संयुता—
स्तत्त्वैकप्रतिलोकिनो मुनिवराश्श्रीशौनकाद्या इह १५

---

१ परिजनैः। २ मरुतामिदं मारुतम्। ३ देवेन्द्रः। ४ गन्धर्वाणामिदं गान्धर्वम्। ५ श्रेष्ठान् शंखादिनिधीन्। ६ कामधेन्वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ख्यातौ तुंबुरुनारदौ श्रुतिसुखं गातुं समभ्यागतौ
नैजामंशुततिं सहस्रकिरणः प्रख्यापयन् भासते ।
निश्शेषं तिमिरं विहायसतलाद्दूरीबभूव प्रभो
श्रीरङ्गेश्वर! भोगिभोगशयनादुत्थीयतामञ्जसा ॥ १६ ॥

गाथा ॥ ८ ॥

निर्दोषान् पटहोत्तमानपृथुलान् [1]गान्धालकान् मर्दलान्
सद्वीणामुरलीस्तथैव महतीश्शब्दाप्य भेरीस्स्फुटम् ।
गायन्तस्सुचिरेण रात्रिसमये गन्धर्वयक्षामरा
योगीन्द्रा गरुडाश्च किन्नरगणास्सिद्धास्तथा चारणाः ॥
संजाताः किल मोहयुक्तमनसस्संसेवितुं तेऽधुना
पादांभोजयुगं रमाप्रियपते श्रीरङ्गपृथ्वीपते ।
एतेभ्यः [2]करुणार्द्रदृष्टियुगलं संप्रेषितुं सादरं
भोगीन्द्राधिपभोगरूपशयनादुत्थीयतामञ्जसा ॥ १८ ॥

गाथा ॥ ९ ॥

---

१ वाद्यविशेषोयं द्रमिडदेशप्रसिद्धः । २ एतान् भवदीयकटाक्षपात्राणिकर्तुमिति यावत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संकोचं परिमुञ्चति स्म कमलं सौरभ्यसम्पूरितं
प्राचीदिक्स्थपयोनिधेस्समुदितो भास्वान् सहस्रांशुकः।
ढक्कासोदरमध्ययुक्तवनितास्स्नात्वा कचान्निर्जलान्
कृत्वाऽऽस्फाल्य धृताम्बरा उपगतास्सह्याद्रिकन्यातटात्
सत्पुष्पैस्तुलसीस्रजा च पिटकं संयुक्तमूढ्वा भुजे
भक्तांघ्र्युद्भवरेणुसंज्ञमधुना मामागतं त्वज्जनम् ।
कारुण्यार्ह इति त्वदीयकृपया त्वद्दासदासोत्तमं
कर्तुं रङ्गपते ! भुजङ्गशयनादुत्थीयतामञ्जसा ॥ २० ॥

गाथा ॥ १० ॥

श्रीकाञ्चीपरवादिभीकरगुरोर्वंशेऽभवद्यस्सुधी
रङ्गार्याह्वयभूषितो जलनिधे राकाशशाङ्को यथा ।
तत्सूनुस्तदनुग्रहात्तधिषणालेशः प्रबन्धं ह्यमुं
"श्रीमद्रङ्गपतिप्रबोधन"मिति ख्यातं स्म[2] चेक्रीयते २१

---

१ मित्रम्मामकामित्यपारकृपयेति वा पाठ्यम् । २ चेक्रीयते स्म चकारेत्यर्थः । यङन्तप्रयोगः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिरुप्पाळ्ळियेळुच्च्याख्यो भक्तांघ्रिरजसा पुरा ।
रचितो योयमस्माभिर्गैर्वाण्या परिवर्तितः ॥ २२ ॥
पराभवेब्दे कटके कृष्णाष्टम्यां रवेर्दिने ।
रचितोयं प्रबन्धः श्रीवासुदेवपदेऽर्पितः ॥ २३ ॥
आर्याः ! पण्डितवर्याः ! ! कृतिरेषा मन्दधिषणस्य ।
परिशोध्य तत्र भवतामङ्गीकार्येत्युदश्वये नतिभिः २४

इति श्रीकाञ्चीप्रतिवादिभयंकरहस्त्यद्रिनाथापरनामधे-
याण्णंगराचार्यमहाशान्तविरचिता श्रीरङ्गनाथप्र-
बोधनप्रबन्धप्रतिकृतिस्सम्पूर्णा ।

॥ श्रीरस्तु ॥

---

१ एतन्नामा द्रामिडप्रबन्धः प्रसिद्धतरः ।

पुस्तकमिलनेका ठिकाना—
खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम् प्रेस–बंबई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीरस्तु ॥

श्रीमते रामानुजाय नमः ।

श्रीमद्वरवरमुनये नमः ।

श्रीवादिभीकरमहागुरवे नमः ।

धर्मवादः ।

मंगलाचरणम्.

भक्तजनस्तुतशस्तचरित्रं बद्धजनावनबद्धश्रद्धम् ॥
हस्तिमहीधरनिस्तुलरत्नं किञ्चिद्रुचिरं तन्मे शरणम् ॥
वादिभीकृद्गुरुं वन्दे वेदान्तद्वयपारगम् ॥
वरयोगिपदाम्भोजशरणं भवतारणम् ॥
आचार्यपादपादौ शिरसा भक्त्या नतेन संसेव्य ॥
धर्मस्वरूपविवृतिं सुखबोधकृते करोमि बालानाम् ॥

॥ अथ ग्रन्थारम्भः ॥

" धर्मार्थकाममोक्षाख्याश्चत्वारः परिकीर्तिताः ॥
पुरुषार्थाः पुराणैश्च श्रुतिभिस्स्मृतिभिस्तथा ॥ "

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिम्प्रीतिञ्च साधुकाव्यनिषेवणम् ॥ "

स्वस्ति ॥ धर्मार्थकाममोक्षाख्यम्पुरुषार्थचतुष्टयं श्रुतिस्मृतीतिहासपुराणेषु प्रतिपाद्यत इति, तथा लोकेऽपि व्यवह्रियत इति च सर्वजनसंविदितोऽयं विषयः । चतुर्णाममीषां धर्मार्थकाममोक्षाणाम्पुरुषार्थशब्दवाच्यत्वं किन्निमित्तकमिति वाक्कलया विचार्यते ।

" पुरुषैरर्थ्यंत " इति पुरुषार्थ इति पुरुषार्थपदं व्युत्पद्यते । पुरुषैरर्थ्यते—पुरुषैर्याच्यत इत्यर्थः । ' अर्थ—याचने ' इति धातोः । अथ का नाम याचना ? " एतन्ममाभीप्सित " मिति कामनया जायमानः कश्चन व्यापारविशेषः । अत एव हि कस्मिंश्चित्पुरुषे " मया धनमपेक्ष्यत " इति निवेदयति राजानं, जनास्तावत् " अयं राजानं धनं याचत " इति व्यवहरन्ति । स चायं कामनाजन्यो व्यापारविशेषः कायिकवाचिकमानासिक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भेदेन त्रिविधः प्रकीर्त्यते । त्रिविधाश्चैते व्यापारा मानसिकेच्छायाः परेषां ज्ञापनार्थमेव ।

तत्र तावन्मानसिकव्यापारो नाम मानसवर्तिनोर्थस्य यादृश्या शक्त्या परबोधनमन्तरा स्वत एव निर्वहेदवगमस्तादृशशक्तियुक्तेषु देवताप्रभृतिष्वेव केवलमुपयुज्येत । वाचिककायिकात्मकयोरितरयोरुभयोर्व्यापारयोर्मध्ये—"मयैतद्वस्त्वपेक्ष्यत" इति वागुच्चारणरूपो वाचिकव्यापारः; अन्तर्निहितवचनैरंगुल्यादिभिरेवाङ्गैरर्थसंज्ञापनरूपः कायिकव्यापारश्च, प्रायः प्राणिसामान्ये समुपयुज्येयाताम्। एवञ्च, कश्चित् पदार्थमभीप्स्य, तयेच्छया निरुक्तव्यापारेष्वन्यतमो यो नाम व्यापारः क्रियते मनुष्यैः, स पुरुषार्थ इत्युक्तं भवति ।

इयत्या कालकलया "पुरुषार्थपदमनया रीत्या व्युत्पन्नमिति, तस्यायमर्थ" इति च विचारितम् । तेन 'पुरुषार्थसंज्ञा न रूढा, अपि तु यौगिक्येवे' ति च सुस्प-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्टमवागामि । अथ सेयं संज्ञा धर्मार्थकाममोक्षेषु केन पुनर्निमित्तेन व्यवह्रियत इति विचार्यते ।

लोके तावत् ' सुखं दुःख ' मिति पदार्थद्वयम्प्रथते । अथ किन्नाम सुखं ? किन्नाम दुःखमिति विचारं न वयमत्र विधातुमाकलयामो मानसम् । यतोह्यन्यदुपक्रान्तमन्यदापतितं स्यात् । आत्मनिष्ठः कश्चन विलक्षणो ज्ञानविशेष एव सुखदुःखे इति केचित्—, ज्ञाने जायमानौ विभिन्नौ द्वौ धर्माविव ते इति केचित्—, अन्ये च बहवो बहुधा च व्याचक्षते । (तदेतत्परस्ताद्वादान्तरे विस्रब्धं विचारयिष्यामः ।) तयोर्याथातथ्येऽपि सर्वेऽपि ब्रह्मादिकीटान्ताः प्राणिवर्गास्सुखमेवाभिलष्यन्तः, केवलं दुःखे दूयमानमानसाश्च समवलोक्यन्ते । तत्सुखनिष्ठयैव प्रत्याशया तत्कारणीभूतानपि पदार्थानपेक्षन्त इति प्रत्यक्षदृष्टमेवैतत् । शरीरशैतल्यरूपसुखनिष्ठयाऽऽशया तत्कारणीभूतचन्दनादिकमाद्रियामहे खलु । इत्थञ्च सुखतदाधायकपथदार्थावित्येतद्द्वयञ्जीवैरपेक्ष्यत इति फलितम् । तच्च सुख-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैहलौकिकपारलौकिकभेदेन द्विविधम्प्रोक्तम् । धर्मार्थका-
ममोक्षेषु प्राथमिकद्वितयं सुखसाधनत्वेन, उत्तरद्वितयं
स्वतस्सुखत्वेन च जीवैरपेक्ष्येते । धर्मार्थयोर्मध्ये धर्मस्ता-
वत्स्वर्गादिरूपपारलौकिकसुखकारणम्-,अर्थस्तु वनितो-
पभोगादिरूपैहलौकिकसुखकारणमिति च बोध्यम् ।
उभयमुभयस्यापि कारणमित्युक्तावपि न किमपि बाधकमु-
त्पश्यामः । काममोक्षयोर्मध्ये-'काम ऐहलौकिकं
सुखम्-' 'मोक्षस्तु पारलौकिकं सुख' मति च विभागो
बोध्यः । एवमेतद्धर्मादिचतुष्टयं सुखकारणत्वात्सुखरूप-
त्वाच्च पुरुषैरर्थ्यंत इति साधितम् । तथा चैतेषाम्पुरुषार्थ-
संज्ञाधारित्वमुपपद्यत इत्यनवद्यम् ।

एते च पुरुषार्थास्स्वतः पुरुषार्थपरतः पुरुषार्थभेदेन
द्वेधा विभक्ताः । तत्र काममोक्षौ स्वतः पुरुषार्थौ, धर्मार्थौ
तु परतः पुरुषार्थाविति संशब्द्येते । यस्मिन्नाम वस्तुनि
पुरुषाणामपेक्षा वस्त्वन्तरापेक्षायाः कारणीभूता सती

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुत्पद्यते, स परतः पुरुषार्थः; यस्मिन्नर्थेऽभिलाषो वस्त्वन्तरापेक्षाया अकारणीभूतस्स्वत एव सञ्जायते स स्वतः पुरुषार्थ इति च तदर्थो बोध्यः ।

काममोक्षयोस्स्वतः पुरुषार्थत्वं कथमिति चेदुच्यते । लोके तावत्सर्वेषामपि प्राणिनां सुखापेक्षा केन वा हेतुना समुदेतीति विमृशामश्चेत्; तदा "स्वत एव जायत" इति यद्यपि शक्यम्परिज्ञातुम् । तथापि, जनास्सर्वे सुखमेव केवलं कुतोऽभिलष्यन्ति, कुतो वा दुःखं नापेक्षन्त इति यदि पुनः कश्चिदनुयुञ्जीतास्मांस्तदा, "तत्तत्स्वभाव एव तत्र निदान" मित्येव सुवचम्परं न तु यत्किञ्चित्कारणान्तरम् । एवञ्च, काममोक्षयोरपेक्षा वस्त्वन्तरापेक्षाहेतुरसती, तयोस्सुखरूपत्वेन स्वत एव जायत इति द्वयोरनयोस्स्वतः पुरुषार्थत्वं युक्तम् । काममोक्षयोस्सुखरूपत्वमुत्तरत्र वक्ष्यते । सम्प्रति तु धर्मार्थौ विषयीकृत्य तयोर्लोकानामपेक्षणं कया सरण्या समुदेतीति विचारयामः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धर्मो नाम, यज्ञदानादिरूपः क्रियाविशेष एवेति केचित्, यज्ञदानादिनाऽऽत्मन्युत्पद्यमानोऽदृष्टविशेष एव स इति केचित्, उभयमपि च स इत्यपरे कथयन्ति। तस्य याथातथ्येऽपि सुखरूपत्वं न तस्यास्तीति सर्वाभ्युपगतोऽयमंशः। यतो हि सुखन्नामात्मनि जायमानाज्ज्ञानविशेषान्नातिरेकि। एतादृशसुखस्य धर्मकारणकत्वं श्रुत्यादिषु सुस्पष्टम्प्रतिपाद्यते। एवञ्च धर्मस्य सुखसाधनत्वादेव तत्र सतामपेक्षोदयः। सुखापेक्षिभिरेव जनैर्धर्मस्यापेक्ष्यमाणतया धर्मे जायमानापेक्षा सुखापेक्षानिबन्धनैव। एवमेवार्थोऽपि सुखापेक्षिभिरेव जन्तुभिरपेक्ष्यत इति भवति सुव्यक्तमवगतम्। अतश्च धर्मार्थयोः परतः पुरुषार्थत्वं सुप्रतिपन्नं भवति।

प्रियपाठकाः! "धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्थास्सन्ती" ति, "पुरुषार्थपदार्थोऽय" मिति च सम्यगुपपादितमियताप्रबन्धेन। इदानीन्तावद्धर्मस्यापि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरुषार्थत्वमस्ति वेत्येतत्तत्स्वरूपादिनिरूपणपुरस्सरं क्रमशो विचारयितुमुपक्रमामहे । स्वतः परतो भेदेन पुरुषार्थद्वैविध्यम्, तत्र धर्मस्य परतः पुरुषार्थत्वञ्च नातिपूर्वमुपपादि किलास्माभिः ।

प्रायो जगति सर्वेषामभिलाषविषयस्सुखमेवेति निर्विवादं खल्वेतत् । तच्च सुखमात्मनि जायमानः कश्चन ज्ञानविशेष एवेति संक्षेपः । एतदेव सुखमुद्दिश्य धर्मार्थावपेक्ष्येते अस्माभिः । धनमन्तरा को वा पुरुषश्शर्म विन्दति ? न कोऽपि । प्रत्यक्षदृष्ट एवायमर्थः । एवञ्च, अर्थस्य सुखसाधनत्वावगमात्सर्वेऽपि वयमर्थमपेक्षामहे । एवमेव धर्मस्यापि सुखनिदानतया, अर्थादिपुरुषार्थत्रितयस्य च कारणतया च तमेव प्रथमतस्साात्त्विकास्समपेक्षन्ते । अत्र धर्मस्यार्थसाधनत्वं लोकव्यवहारतो युक्तिभिश्शास्त्रैश्च सुगमम् ।

प्रथमतः कीदृशेन लोकव्यवहारेण तत्सिद्धिरिति चेत्; ब्रूमः । " यः प्राक्तनजन्मनि कृतसुकृतस्स जन्मन्युत्तर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्मिन्भवति धनिक इति को हि नाम न जानाति लोक-व्यवहारम् ? । कविकुलचडामणिना श्रीमता श्रीहर्षेणापि स्वकीये नैषधीये काव्ये पञ्चमे सर्गे [१८ श्लो०]

" पूर्वपुण्यविभवव्ययलब्धास्सम्पदो विपद एव विमृष्टाः । "

इत्यस्मिञ्श्लोके ' पूर्वपुण्यविभवव्ययलब्धास्सम्पद ' इत्यभ्यधायि। "पूर्वजन्मकृतसुकृतस्य व्ययाल्लब्धास्सम्पद" इत्येवमर्थोऽस्य वाक्यस्य । तदेतत्किञ्चिद्व्याचक्ष्महे । पूर्वजन्मकृतसुकृतफलत्वेनास्माभिः सम्पदो लभ्यमानतया, सम्पदियं सुकृतरूपमूल्यधनप्रदानेन क्रीतैवेति । इत्थञ्च लोकव्यवहारस्स्फुटयत्यर्थसाधनतां धर्मस्य ।

अथ युक्तिं ब्रूमः । लोके तावत्सर्वेऽपि जना धनिका एव वा दरिद्रा एव वा न हि निशाम्यन्ते । अयमेवार्थोऽन्वग्राह्यद्वितीयकविताचातुरीधुरीणैः श्रीवत्साङ्कमिश्रसुतैः श्रीपराशरभट्टार्यैः । यथा—श्रीगुणरत्नकोशे—,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" एको मुक्तातपत्रप्रचलमणिघणात्कारिमौलिर्मनुष्यो दृप्यद्दन्तावलस्थो न गणयति नतान् यत्क्षणं क्षोणिपालान् । यत्तस्मै तिष्ठतेऽन्यः कृपणमशरणो दर्शयन्दन्तपङ्क्तीस्तत्ते श्रीरङ्गराज प्रणयिनि ! नयनोदञ्चितन्यञ्चिताभ्याम् ॥ " इति ।

तमेनं श्लोकमंशतो व्याख्यास्यामः ।

हे श्रीरङ्गराज प्रणयिनि ! एको मनुष्यो मत्तद्विरदमस्तस्थितो (मुक्तातपत्रप्रचलमणिघणात्कारिमौलिः) मुक्तातपत्रे—मौक्तिकच्छत्रे, गजगमनेन प्रचलैर्मणिभिर्घट्टने घणात्कारिभिश्शब्दायमानो मौलिः किरीटं यस्य स तथोक्तस्सन् (नतान्) स्वचरणयुगलनम्रान्; (क्षोणिपालान्) नानामण्डलाधिपतीन्, न गणयतीति यत् । (इयमैश्वर्यकाष्ठा) अथ दारिद्र्यकाष्ठामाह ॥ " अन्य " इति । अन्य इतरो मनुष्यस्तु, (अशरणः) रक्षकान्तररहितस्सन्, (कृपणम्) दैन्यप्रकाशो यथा भवति तथा-(दन्तपंक्तीः दर्शयन्) तस्मै दन्तावलस्थिताय पुरुषाय,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(तिष्ठते) स्वाशयं प्रकटयंस्तिष्ठतीति यत्तदुभयं—क्रमेण (तव नयनोदञ्चितन्यञ्चिताभ्याम्) नयनयोरुदञ्चितेन—कटाक्षेण, न्यञ्चितेन—सङ्कोचेन च भवतीति शेषः ॥ अत्रायं व्याकरणविचारः । ननु, गतिनिवृत्त्यर्थक 'ष्ठा' धातोः कथं स्वाशयप्रकाशनार्थकता । कथं वा आत्मनेपदिता ? "समवप्रविभ्यस्स्थ" इति सूत्रेण निर्दिष्टोपसर्गोपसृष्टष्ठाधातोरेवात्मनेपदविधानादिति चेत्; ब्रूमः । "प्रकाशनस्थेयाख्ययोश्चे" ति सूत्रेण प्रकाशनार्थकष्ठाधातोरात्मनेपदविधानादिति संक्षेपः ॥ इति ॥

किञ्च, धनिकेष्वपि न हि सर्वेऽपि (धनांशे) परस्परभेदशून्यास्संलक्ष्यन्ते । तत्रापि दृश्यत एव न्यूनाधिकभावः । एकं लक्षाधिकारिणमपरं नियुताधिकारिणमितरमयुताधिकारिणमन्यं सहस्राधिकारिणञ्चेति परस्परवैलक्षण्येन पश्याम एव खलु । किम्पुनर्निदानमत्रेति यदि कश्चित् पृच्छेत्, प्राक्तनजन्मकृतसुकृतदुष्कृते एवैतादृशाभेदहेतू इत्येव वक्तव्यम्भवति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" नैवम्; निरङ्कुशस्वातन्त्र्यो भगवान् सर्वेश्वर एवैवं स्वेच्छया तरतमभावमुत्पादयती " ति चेदुच्येत, तदा तस्य नूनमापद्येत— " देवानां दानवानाञ्च सामान्यमधिदैवतम् । " इत्याद्युक्तसर्वसमत्वनिष्पक्षपातत्वयोर्मिथ्यात्वम् । ननु, एवमपि—पूर्वस्मिञ्जन्मनि कस्य चित्सुकृतचिकीर्षोत्पादनं, कस्यचिद्दुरितचिकीर्षोत्पादनञ्च भगवतः पक्षपातकृत्यमेव खलु ? अतो निष्पक्षपातत्वसर्वसमत्वयोर्मिथ्यात्वं तदवस्थमेवेति चेत्; भोः ! श्रुतिरुद्घाट्यताम्—,

" आदावीश्वरदत्तयैव पुरुषस्स्वातन्त्र्यशक्त्या स्वयं
तत्तत्कर्मचिकीर्षणप्रयतनान्युत्पादयन्वर्तते ॥
तत्रोपेक्ष्य ततोनुमत्य विदधत्तन्निग्रहानुग्रहौ
तत्तत्कर्मफलम्प्रयच्छति ततस्सर्वस्य पुंसो हरिः ॥"

इति श्रीमद्वरदगुर्वनुगृहीत " तत्त्वसार " श्लोकभावबन्धानभिज्ञानादीदृशाक्षेपस्समुत्पद्यत इत्यलं विस्तरेण ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न च, वह्निपाथसी निसर्गत एव यथोष्णशीते, तथ लोका अपि स्वभावत एव धनिका दरिद्राश्च भवन्तीति सुवचम् । नैर्धन्यसाधन्ययोस्स्वाभाविकत्वे, वैश्वानरपानीययोरौष्ण्यशैत्ये यथा न कदापि विलीयेते, तथा तयोरपि विना विलयं सार्वकालिकत्वं स्यात् । न हि वयमेवं क्वापि निशामयामः । अस्मिन्दिने यो हि पुमान् दरिद्रो भाति, स श्वो भवति कुबेरः । अस्मिन्दिने यो धनिको भाति, स च परेद्यवि भजति दारिद्र्यम् । अतश्च, धनिकत्वदारिद्र्ययोर्नैसर्गिकत्वं दुर्वचमेव । किञ्च पश्यत, एतयोक्षणिकत्वमभिप्रेत्य तत्र भवता भवभूतिमहाकविना भावगर्भमाख्यातं किमपि श्लोकरत्नम्प्रदर्शयाम्रोऽत्र ।

" पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् । " इति

एतेन, लोके एवमेव जनाः क्षणं दरिद्राः क्षणं धनिकाश्च वर्तेरन्निति व्यज्यत इति कुवलयानन्दे समासोक्तिप्रकरणे पष्टम् । तत्रत्या चेयम्पंक्तिः । यथा—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"अत्र वनवर्णने प्रस्तुते तत्सारूप्यात्कुटुम्बिषु धनसन्तानादिसमृद्धयसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तान्तः प्रतीयते" ॥ इति ।

आस्तां तावदेतत् । एवञ्च, धनिकताया दरिद्रतायाश्च धर्माधर्मावेव प्रधानं निदानमिति स्पष्टम् । इत्थञ्च, युक्त्या धर्मस्यार्थकारणत्वं सिद्धम् ।

अथ शास्त्रेणाप्येतत्सुसाधमेव । तत्क्रमं चात्र संग्रहेण ब्रूमः । आपस्तम्बमहर्षिणा स्वकीये धर्मशास्त्रे—

"सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् । ततः परिवृत्तौ कर्मशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते ।"

इति धर्मस्यार्थहेतुता प्रत्यपादि । अस्यायमर्थः । सर्ववर्णेष्वपि स्वस्वसमयसिद्धान्धर्माननुतिष्ठतामनुत्तममपरिमेयञ्च सुखं (परस्मिँ) ल्लोके लभ्येत । [ततः परिवृत्तौ] जन्मान्तरे तावत्, अवशिष्टस्य कर्मणः 'फलत्वेन जातिरूपवर्ण-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बलबुद्धिज्ञानद्रव्यधर्मानुष्ठानानि भजत ' इति । तत्र, " द्रव्याणी " त्यर्थस्यापि पूर्वजन्मीयधर्मकारणकत्वमुक्तम् । एवञ्च शास्त्रेणापि धर्मस्यार्थसाधनत्वं समजनि सूपपादम् । तथा च, अद्य यावद्धर्मस्यार्थसाधनत्वं लोकव्यवहारयुक्तिशास्त्रैर्निरूपितम् ॥ अथ धर्मस्य कामसाधनत्वं विचारयितुमुत्तिष्ठे । एतद्विचारात्प्राक् ' को नाम काम ' इति च किञ्चिद्विचार्यते ।

यदि वयं कामशब्दार्थं विचारयामस्तदा " काम्यत इति काम " इति व्युत्पत्तिबलात्कामशब्दस्य, " इष्यमाणं वस्त्व " त्यर्थो लभ्येत । परं जगतीष्यमाणानि पशुधान्यधनकलत्रपुत्रादीनि वस्तूनि न कोऽपि कामशब्देन व्यवहरति । अतः कामपदं यौगिकमगृहीत्वा, योगरूढमेव ग्राह्यम् (पङ्कजादिवत्) कामो नामात्मनि जायमानस्सुखविशेष एव ।

लोके इष्यमाणेषु वस्तुषु सुखस्याप्यन्यतमतया, काम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदमेतदीदृशं सुखमेव लक्षयति । यद्यपि क्वचित्क्वचित्सुखसाधनेष्वपि वस्तुषु कामशब्दव्यवहारो दृश्यते, तथापि सुख एव तस्य प्राधान्येन प्रवृत्तिः; तत्कारणेषु तु गौणत्वेनैवेति बोध्यम् । किमयमर्थस्स्वोपज्ञः ? उत परोपज्ञ इति चेत्; उत्तरः कल्प एवोदारः कल्पः । तथा हि—वात्स्यायनमहर्षिप्रणीते कामसूत्रे, (द्वितीयाध्याये)

"श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः कामः" इत्यस्य सूत्रस्य व्याख्यायां यशोधरेण—"आत्मा हि तद्द्वारेण विषयम्भुञ्जानस्सुखमनुभवति । यत्तत्सुखम्प्रधानङ्कामः" इति,—"तस्य निबन्धनमिच्छोपगृहीता प्रवृत्तिः; सापि काम इत्युपचर्यते" इति च्याख्यायि । [इति ।]

एवञ्च, "आत्मन्युत्पद्यमानः कश्चन सुखविशेष एव काम" इत्यर्थलाभादस्य धर्मकारणत्वं सुबोधमेव । प्रागुदाहृते आपस्तम्बवचने—"सर्ववर्णानां स्वधर्मानुष्ठाने परम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिमितं सुखम्”। इत्यनेन धर्मानुष्ठानादमितमुत्तमोत्तमं च
सुखमुत्पद्यत इत्युक्तिरेवात्र पर्याप्तमुचितञ्च ॥ प्रमाणम् ।

अथ—धर्मो मोक्षकारणतामवगाहते वेत्येतद्विचारयि-
तुमुपक्रमे । मोक्षपदप्रवृत्तिनिमित्तन्तावत्तत्तन्मतप्रविष्टानां
समयेषु विविधविविधं वरीवर्ति । तत्र वेदबाह्यचार्वाकादि-
मतमुद्दिश्य नात्र किञ्चिदप्यभिधित्स्यते । वेदप्रामाण्यम-
भ्युपगच्छतां वैदिकानामभिसन्धिः परिशील्येत चेत्; तद-
भ्युपगतस्वप्रवृत्तिनिमित्तशालिनां मोक्षाणां, धर्मस्साक्षात्पर-
म्परया वा कारणं भवतीत्यत्र नाक्षेपावकाशकणिकाप्या-
लक्ष्येत । वैदिकमतेषु द्वैताद्वैतविशिष्टाद्वैतानामेव प्राधा-
न्यम् । उत्तरभारते (North india) तावद्वल्लभमतस्यापि
प्राधान्यमङ्गीकृतमस्तीति श्रूयते । किमनेनाद्य । प्रसिद्ध-
तमपूर्वोक्तमतत्रयप्रविष्टानां मतमनुसृत्य मोक्षपदप्रवृत्तिनि-
मित्तमभिधीयते संक्षेपतः ।

अद्वैतिनस्तु, चिरन्तनयाऽविद्यया परब्रह्मणस्सत्यं
स्वरूपमपह्नुतम्भवति; प्रकृष्टातपदशायां विप्रकृष्टदेशवर्ती

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कश्चित्पुरुषो विप्रकर्षात्मकदोषाद्यथा पुनश्शुक्तिकामवलोक्य "रजतमिद" मिति भ्राम्यति, तथा ब्रह्मापीदं स्वस्वरूपतिरोधानात्स्वस्मिञ्जगदस्तीति भ्राम्यति; शुक्तिकायां रजत (त्व) भ्रमवतः पुरुषस्य "इदन्न रजत—" मिति प्रमात्मकज्ञानोदयोत्तरं यथा शुक्तौ रजत (त्व) भ्रमो निवर्तेत, तथा ब्रह्मणोऽपि स्वस्वरूपपरिज्ञानादूर्ध्वं स्वनिष्ठजगदाधारत्वभ्रान्तिर्निवर्तेत; एवञ्च, भ्रमसमासादितजीवभावस्य ब्रह्मणो भ्रमहेतुभूताविद्यानिवृत्तिरेव मोक्षः। सा चाविद्या ब्रह्मस्वरूपविज्ञानात्परमेव निवर्तेतेति, तच्च ब्रह्मस्वरूपमाचार्योपदिष्ट "तत्त्वमसी" त्यादिवेदवाक्यैरेवावगन्तुं शक्यमिति च समाचक्षते ।

कल्पे तावदस्मिन्नविद्यानिवृत्तिरूपमोक्षम्प्रति धर्मस्य साक्षात्कारणत्वविरहेऽपि, "अविद्यानिवृत्तिम्प्रति" "तत्त्वमसी" त्यादिवेदवाक्यार्थज्ञानमावश्यकम्, तच्चाचार्यकर्तृकबोधमन्तरा नोत्पद्येत । एवं ब्रह्मणस्स्वरूपमवगन्तुन्तत्रे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्छोत्पत्तिरावश्यकी, सा च सत्त्वगुणोन्मस्तकतां विना नोदियात्, तच्च सत्त्वौन्मस्तक्यं यज्ञदानादिरूपधर्मानुष्ठानमन्तरा न सम्भवतीति तेषामभिसन्धानाद्धर्मस्य मनस्संशोधनसत्त्वगुणपरिपूर्त्युत्पादनद्वारा परब्रह्मस्वरूपजिज्ञासाजनकत्वात्परम्परया मोक्षकारणत्वं सम्प्रतिपद्यते ।

द्वैतिनस्तु, "पृथिव्यप्तेजोवाय्वाकाशरूपपञ्चभूतबन्धस्य समूलनिवृत्तिरेव मोक्षः, स च भगवतस्साक्षात्कारेण समुत्पद्यते, स च 'श्रोतव्यो मन्तव्य' इत्यादिश्रुतिविहितश्रवणमननादिना जायते, तच्च—कर्मानुष्ठानजनितचित्तनैर्मल्यवैराग्यादिशालिनामेव पुंसामुदेति" इति कथयन्ति ।

कल्पे चैषां धर्मस्य साक्षान्मोक्षकारणत्वाभावेऽपि श्रवणादिहेतुभूतमनोनैर्मल्यजनको धर्म इति तेषामभिसन्धानात्परम्परया मोक्षकारणत्वं सम्प्रतिपद्यते ।

विशिष्टाद्वैतिनस्तु—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवाताशुमद्ग्लौ-
विद्युद्वरुणेन्द्रधातृमहितस्सीमान्तसिन्ध्वाप्लुतः ।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन्परब्रह्मणस्सा-
युज्यं समावाप्य नन्दति समं तेनैव धन्यः
पुमान् ॥ "

इत्यादिप्रकारेण—अर्चिरादिमार्गेण ब्रह्माण्डन्तदुपरिवर्तिप्रकृतिमण्डलञ्चातीत्य विरजाख्यान्नदीमवगाह्य ततः परमपदाभिधानं लोकमुत्तममासाद्य स्वस्वरूपमवगम्य परब्रह्मणस्तद्गुणानाञ्च निरन्तरनिर्विघ्नानुभव एव मोक्ष इत्युशन्ति ।

पक्षे चास्मिन्, निरुक्तमोक्षस्य भक्तिः प्रधानोपाय इति—

" जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ "

इत्यादिना परस्सहस्रेषु जन्मसु तप्तेन कायक्लेशादिरूपतपसाऽपोहितपाप्मनामेव भक्तिरुन्मिषतीत्यभिधानाच्च,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।"
इति श्रुतौ केवलां भक्तिं विनिन्द्य, अविद्याख्यकर्मणा मोक्षप्रतिबन्धकीभूतपातकजातान्यपोह्य विद्याऽभिधानया भक्त्या मोक्षम्प्रतिपद्यत इत्युक्तेश्च, सा च भक्तिः कर्मानुष्ठानमन्तरा नोत्पद्यत इति च तैरुच्यमानतया धर्मस्य मोक्षकारणतापि सुगमा ॥

एवं धर्मस्य सुखसाधनत्वादर्थादिपुरुषार्थसाधनत्वाच्चैतं सर्वेऽप्यपेक्षन्त इति सुष्ठु निरूपितम् ॥

अत्र च किञ्चिद्वैचित्र्यम्पश्यत । धर्मो धर्मस्यैव धर्मस्यापि वा कारणं भवतीति च भवति वक्तव्यम् । तथा हि—लोके तावत्केचिद्धर्मानुनिष्ठासवः केचिदतथाभूताश्च निरीक्ष्यन्ते । एवन्नाम केषाञ्चिद्धर्मानुष्ठानेच्छा, परेषान्तत्रालक्ष्यताधीश्च पूर्वजन्मकृतकर्मफलमेवेति मन्तव्यम्भवति । अत एव पूर्वोदाहृतापस्तम्बवचने " धर्मानुष्ठानमिति प्रतिपद्यत " इति धर्मफलत्वेन धर्मानुष्ठानञ्च सम्भवतीत्यनुशिष्टम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ईदृक्प्रभावोऽयं धर्मो वेदस्मृतीतिहासपुराणागमादिषु विशेषतः प्रशस्यते । तत्र च दिङ्मात्रं सूचयामः । तैत्तिरीयोपनिषदि षष्ठप्रश्नैकोनपञ्चाशानुवाकपठितैः ।

" धर्म इति धर्मेण सर्वमिदम्परिगृहीतम् ।

धर्मान्नातिदुश्चरं, तस्माद्धर्मे रमन्ते । "

इत्यादिभिर्मन्त्रैरन्यादृशी खलु समाकलिता धर्मप्रशंसा । तस्मात्त्रिविधपुरुषार्थसाधनीभूतोऽयं धर्मस्सर्वेषामनुष्ठेयो भवतीति सर्वमवदातम् ॥

श्रीकाञ्चीवादिभीकृद्गुरुचरणमहावंशजातस्तदीयश्रीपादाम्भोजयुग्मानवरतपरिचर्यात्तकिञ्चिन्मनीषः । अण्णङ्गाचार्यनामा सकलबुधमनस्तृप्तिसिद्ध्यर्थमेतच्चक्रे सद्धर्मवादानुवदनमनसूयैः परिग्राह्यमाशु ॥ १ ॥

इति श्रीकाञ्चीप्रतिवादिभयङ्करहस्त्यद्रिनाथापरनामधेयाण्णङ्गराचार्यानूदितो धर्मवादस्समाप्तः ।

॥ श्रीकृष्णार्पणमस्तु ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्यग्रंथाः।

नाम. | की. रु.

शिशुपालवध—(माघकाव्यम्) मल्लिनाथकृतटीकासहितम् इसमें नारदजीको भगवद्दर्शन शिशुपालवधार्थ उद्धव बलराम श्रीकृष्णको निमंत्रण द्वारका समुद्रवर्णन रैवतपर्वतवर्णनादि २० सर्गमें अपूर्व काव्यहै विद्यार्थी लोग अवश्य पढके प्रसंगोपात्त उदाहरण देसकते हैं ... ... २॥)

" " तथा पूर्वार्द्ध ९ सर्गमें ... ... १)

रघुवंश महाकाव्य कालिदासकृत—मल्लिनाथकृत संजीवनी टीका और टिप्पणी समेत इसमें राजा दिलीपसे लेकर लवकुशके चरित्रतक १९ सर्ग हैं विद्यार्थियोंको परम उपयोगी है इसकी महिमा कौन नहीं जानता पक्की जिल्द १॥)

" " तथा सादीजिल्द ... ... १)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रघुवंशमहाकाव्य—सटीक तथा रामकृष्णाख्य विलोम काव्य—सटीक ये दोनोंका एक गुटका है बारीक अक्षर... .... ॥=)

रघुवंशमहाकाव्य—पं०—ज्वालाप्रसाद मिश्रकृत सान्वय भाषाटीकां पदयोजना तात्पर्यार्थ और सरलार्थसहितं ग्लेज ... ... ३॥)

" " तथा उपरोक्त अलंकार सहित रफ-कागज ... ... ३)

कुमारसंभव—कालिदासकृत और मल्लिनाथकृत संजीवनीटीकासमेत जिसमें पार्वतीजीकी उत्पत्ति ब्रह्माजीका तारकासुरसे क्लेशित देवोंको शिक्षा मदनदहन रतिविलाप पार्वतीके तपका उदय पार्वतीका शिवजीसे विवाह करनेके निमित्त हिमवान्‌के पास सप्तऋषियोंको भेजकर विवाहका निश्चय और शिवपार्वतीजीका विवाह विधिपूर्वक वर्णन है ... ... १।)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भामिनीविलास—महावीरप्रसाद द्विवेदीकृत भाषाटीका सहित इसमें प्रस्ताविकविलास श्रृंगारविलास करुणाविलास शान्तविलासादि विषयहैं १)

" तथा मूल मात्र ... ... ।)

भर्तृहरिशतक—नीति, श्रृंगार, वैराग्य भाषाटीका समेत इसके अनन्तर नीतिशतकमें निंदाप्र० विद्वत्प्रशंसा मानशौर्य प्र० दुर्जननिन्दा सुजनप्रशंसा धैर्यप्रशंसा दैवप्रशंसा कर्मप्रशंसा और श्रृंगारशतकमें षट्ऋतुवर्णन दुर्विरक्तवर्णन स्त्रीपरित्याग प्र० यौवन प्र० कामिनीग्रहण सुविरक्त और वैराग्यशतकमें तृष्णाधिकार मदनविडंबन विषयोंका रूपतिरस्कार दुर्जनपुरुषोंकी निन्दाहास्यका वर्णन भोगपद्धति कामनिर्वेदताका स्वरूप इत्यादि वर्णन हैं देखने ही योग्य है ... ... १)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गीतगोविंद—राधाविनोदसहित भाषाटीका जयदेव गोस्वामिकृत इसमें अतिललित संस्कृतमें रागमय राधाकृष्णका प्रेममय भक्तिकी गानेकी चीजें विद्यमान हैं... ... ... १)

” तथा मूल ... ... =)

नलोदय काव्यम्—सटीक महाराजा नल और दमयंतीका चरित्र वर्णन ... ... ।।।)

ललितरामचरित्र—काव्यसटीक ... ... १)

ऋतुसंहार काव्यम्—कालिदासकृत और चौर कविकृत चौरपंचाशिका काव्यम् इसमें षट्ऋतु वर्णनादि राजकुमार बाबू देवनंदनसिंहकृत भाषाटीका छंदोबद्धहै ... ... ।≡)

विद्वन्मोदतरंगिणीकाव्यम्—चिरञ्जीव भट्टाचार्य्यरचित गद्यपद्य विभूषित (विद्वानोंको अति उपयोगी) सर्व शास्त्र और सर्व संप्रदायोंका सिद्धान्त दिखाया है. .... ।)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेघदूत काव्य—कालिदासकृत सान्वय मल्लिनाथी टीका और भाषाटीका समेत इसमें मेघका वर्णन है ... ... ॥)

मेघदूतकाव्य—सटीक ... ... ।≈)

अमरुशतक—(शृंगार और वेदान्तपर काव्य दो टीका सहित) ... ... ॥≈)

वसंतशतक—सटीक (संस्कृत) वसन्त ऋतुका वर्णन है ... ... ≈)

राक्षसकाव्य—संस्कृत टीका और भाषाटीका सहित ... ... ≈)

रामकृष्ण विलोम काव्य—सटीक ... ... ।)

गंगालहरी—अन्वयार्थ भाषाटीका (पं० जगन्नाथ कृत गंगाजीकी स्तुति)... ... ... ≈)

कृष्णकर्णामृतकाव्य—(भक्तिमय) ... ... ।)

राधाविनोद काव्य—भाषाटीका सहित ... ... ≈)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शृंगारतिलक—भाषाटीकासहित शृंगार रसका अपूर्व वर्णन है ... ... ।)

शृंगारादिनवरसनिरूपण—भाषाटीका सहित शृंगारका अतीव चमत्कारी वर्णन इसमें शृंगार वीर करुणा अद्भुत हास्य भयानक बीभत्स रौद्रका सूक्ष्मसे वर्णन और शान्त रस विस्तारमें वर्णन है ... ... ।)

रंभाशुक संवाद—संस्कृत मूल व प्रत्येक श्लोकका कवित्तमें टीका व भाषाटीका सहित अति मनोरंजक काव्य है ... ... =)

पद्यावली--अनेक महानुभावोंके संगृहीत श्लोक... ॥)

कृष्णामृत तरंगिका—सटीक ... ... ।-)

विद्यासुन्दर--और चौरपंचाशिका भाषाटीका सहित ।)

कलिविडंबन—भाषाटीकासह (कलियुग प्रभाव वर्णन) ... ... ≈)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सौन्दर्यलहरी—सटीक (देवीकी स्तुति) ... ॥=)

वैराग्यशतक—संस्कृतटीका. और भा० टी० ... ।=)

मूर्ख शतक—भाषाटीका ... ... ॥=)

पद्यमुक्तावली—इसके श्लोकोंके आदिमें क्रमसे स्वर-
व्यंजनोंके अक्षर आतेहैं ... ... –)॥

काव्यमंजरी—(पदुमनदासकृत) ... ... १॥)

अश्वधाटीकाव्य—भा० टी० ... ... ।)

भक्तिरत्नावली—श्रीमद्भागवतोद्धृत स्तुतिसंग्रह... ।)

घटकर्परकाव्य--भाषाटीका ... ... =)

कविरहस्य--सटिप्पण ... ... ।)

शंकरदिग्विजयसार सटीक--श्रीमद्धर्मस्थापकपरिव्रा-
जक श्रीमच्छंकराचार्यजीका मंडनमिश्रादिसे
और मतवादियोंसे शास्त्रार्थ और शंकराचार्य-
जीका जीवनचरित्र इत्यादिवर्णनहै ... २)

मध्वविजयमूल ... ... ॥।)

" तथा सटीक ... ... ४)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किरातार्जुनीय काव्य सटीक ग्लेज १॥) रफ १॥)

दृष्टान्तरत्नाकर-(अतीवोपयोगी) काव्यहै ... ।)

दृष्टांतशतक दोहा भा० टी० इसके श्लोक दोहोंमें, यह विचित्रताहै कि पूर्वार्द्धमें दृष्टान्त और उत्तरार्द्धमें दार्ष्टांत क्रमसे कहेगयेहैं ... ... ≈)॥

राधाकृष्णभूषण--काव्य ... ... ≈)

भोजप्रबंध--मूल कविबल्लाल कृत इसमें भोजराजाका चरित्र राजनीति संबंधी वर्णनहै ... ।≈)

भोजप्रबंध--भाषाटीकासमेतं ... ... १।)

भोजप्रबंध--केवलभाषामात्र ... ... ॥)

दशकुमारचरित्र-(संस्कृत) ... ... १॥)

हितोपदेश-मूल (संस्कृत) ... ... ।≈)

हितोपदेश-विष्णुशर्माप्रणीत पं० बलदेवप्रसादकृत भाषाटीकासमेत इसमें नीतिसंबंधी कथा अतिबोधदायक लाभकी रीति इत्यादि वर्णन किया-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गया है ऐसा हितोपदेश आजतक नहीं छपा इसमें आशय उपदेश और श्लोकोंका पता आदि सब हैं ... ... १।)

भोज और कालिदास—भाषाटीका राजाभोज और कालिदासकी चातुर्य्यकी उत्तमोत्तम कथाका संग्रह ।।।≈)

पंचतंत्र—विष्णुशर्म्माकृत और पं. ज्वालाप्रसाद मिश्रकृत भाषाटीकासहित मित्रसंप्राप्तिकाको- लूकीय लब्धप्रणाश अपरीक्षितकारक पांच तंत्रोमें नीतियुक्त सर्वोत्कर्षहै ... ... २)

पंचतंत्र मूल—विष्णुशर्माकृत नीतिशास्त्र ... १॥)

रघुवंश काव्य—सटीक सर्ग १ से ५ तक .... ।)

" सर्ग ६ से १० तक ... ... ।)

जातिनिर्णय—भाषाटीका ... ... ॥)

कृष्णलीलामृत काव्य— ... ... ।–)

गुरुपीयूषलहरी— ... ... ।≈)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीतिरत्नमाला–भाषाटीका ... ... ।)
बालालंकार–संस्कृतकाव्य ... ... ।।।)

अलंकारग्रंथाः ।

कुवलयानंदटीक--(जयदेवपंडितरचित चंद्रालोकका व्याख्यानरूप) अप्पयदीक्षित विरचित और वैद्यनाथ कृत अलंकार चंद्रिका टीकासमेत इसमें काव्यहेतु काव्यदोष काव्यगुण शब्दालंकार परिसंख्या अर्थालंकार परिसंख्या इत्यादिअलंकारोंका वर्णनहै ... ... १)
सुभाषितरत्नभांडागारम्– ... ... ३॥
सुभाषित रत्नाकर ... ... २)
सुभाषितसार–मूल और भाषाटीकासहित ... ॥)

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" स्टीम् प्रेस–बंबई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्रेयमभ्यर्थना.

अत्रास्माकं मुद्रणालये ऋग्वेदादयो वेदा उपनिषदो वेदान्तग्रंथा महाभारतादीतिहासाः श्रीमद्भागवतादि-महापुराणोपपुराणानि धर्मशास्त्र-कर्मकाण्ड-व्याकरण-न्याय-योग-सांख्य-मीमांसादि-शास्त्रीयग्रन्थाः काव्य-नाटक-चम्पू-प्रभृतयो ग्रन्थाः सहस्रनामाद्यनेक-स्तोत्रग्रन्थाश्च विविधभाषाग्रन्थाश्च सीसकोत्तममहल्लघ्वक्षरैर्मनोहरं मुद्रिता आसते योग्यमूल्येन क्रय्याः सन्ति तांश्च ग्राहका यथापुस्तकसूचीपत्रं मूल्य-प्रेषणेन प्राप्नुयुः ।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम् ।

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणालयाध्यक्ष-मुंबई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection